CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

1. Kalasthapanam
2. Ganesha Puja
3. Madhuparka Vidhi
4. Purapaha Vachana Vidhi
5. Matrika Puja Vidhi
6. Sankalpa Vriddi Shraddha Vidhi
7. Graha Puja Vidhi
8. Mandapa Vastu Vidhi
9. Mandapa Charana Puja Vidhi
10. Janmotsava Vidhi
11. Ghrita Chaya Vidhi
12. Go Dana Vidhi
13. Abhisheka Ashirvada Mantra

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Karmakāṇḍa paddhati

द. नं. १६८६२

अथकर्मकाराडपद्धतिः सचित्र १

मू. ४०।-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

क॰प॰ श्रीगणेशायनमः नत्वागजाननंदेवंवृद्धिदांशारदांगुरुम्· वासिष्ठींपद्धतीं
१ पूर्वांगतप्रायांविलोक्यच· गणेश्वरस्यपुत्रेणरामदत्तेनसूरिणा· पद्धतिः क्रि
यतेधर्म्यारम्यावाजसनेयिनाम्· तत्रादौसकलकर्मसाधारणत्वात्स्वस्तिवाच
नंलिख्यते॥ ॐस्वस्तिनोमिमीतामश्विनाभगःस्वस्तिदेव्यदितिरनर्वणः स्व
स्तिपूषाऽअसुरोदधातुनःस्वस्तिद्यावापृथिवीसुचेतुना १ स्वस्तयेवायुमुप
ब्रवामहैसोमंस्वस्तिभुवनस्ययस्पतिः बृहस्पतिंसर्वगणंस्वस्तयेस्वस्तयऽआ
दित्यासोभवन्तुनः २ विश्वेदेवानोअद्यास्वस्तयेवैश्वानरोवसुरग्निःस्वस्तये· १

म

देवाऽअवन्त्वृभवःस्वस्तयेस्वस्तिनोरुद्रःपात्वंहसः ३ स्वस्तिमित्रावरुणास्व
स्तिपथ्येरेवति स्वस्तिनऽइन्द्रश्चाग्निश्चस्वस्तिनोऽअदितेकृधि· स्वस्तिपन्था
मनुचरेमसूर्याचन्द्रमसाविव पुनर्ददताघ्नताजानतासङ्गमेमहि ४ स्वस्त्य
यनंतार्क्ष्यमरिष्टनेमिंमहद्भूतंवायसंदेवतानां· असुरघ्नमिन्द्रसखंसमत्सु
बृहद्यशोनावमिवारुहेम· ५ अंहोमुचमांगिरसंगयञ्चस्वस्त्यात्रेयंमनसा
चतार्क्ष्यम्· प्रयतपाणिःशरणंप्रपद्येस्वस्तिसंवाधेष्वभयन्नोऽअस्तु· ६ ॥
इतिऋग्वेदीयस्वस्तिवाचनम्· अथयजुर्वेदीयम्· आनोभद्राःक्रतवोय॰

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क॰प॰ न्तुविश्श्वतोदब्धासोऽअपरीतासऽउद्भिदः। देवानोयथासदमिद्वृधेऽअसन्न
२ प्प्रायुवोरक्षितारोदिवेदिवे ।१। देवानाम्भद्रासुमतिर्ऋजूयतान्देवानाᳪरातिर
भिनोनिवर्त्ततामु। देवानाᳪसक्ख्यमुपसेदिमावयन्देवानऽआयुःप्प्रतिरन्
तुजीवसे ।२। तान्पूर्व्वयानिविदाहूमहेवयम्भगम्मित्रमदितिन्दक्षमस्रिधम्।
अर्य्यमणंवरुणᳪसोममश्विनासरस्वतीनःसुभगामयस्करत्। ।३। तन्नोवातो
मयोभुवातुभेषजन्तन्माता पृथिवीतत्पिताद्यौः। तद्ग्रावाणःसोमसुतोमयो
भुवस्तदश्विनाशृणुतन्धिष्ण्यायुवम्। ।४। तमीशानञ्जगतस्तस्थुषस्पतिं २

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्धियस्त्रिन्द्रमवसे हूमहे वयम् । पूषानो यथा वेदसामसद्वृधे रक्षिता पायुरद
ब्धः स्वस्तये ५ स्वस्ति न ऽ इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः । स्वस्ति
नस्तार्क्ष्यो ऽ अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्द्दधातु ६ पृषदश्वा मरुतः पृ
श्निमातरः शुभंयावानो विदथेषु जग्मयः अग्निजिह्वा मनवः सूरचक्षसो वि
श्वे नो देवा ऽ अवसागमन्निह ७ भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्ये
माक्षभिर्य्यजत्राः स्थिरैरङ्गैस्तुष्टुवांसस्तनूभिर्व्य ऽ शेम हि देवहितं यदायुः
८ केचित् त्रिकमपि पठन्ति । शतमिन्नु शरदो ऽ अन्ति देवा यत्रा नश्चक्रा जरसन्त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

के॰प॰ नूनाम॰ पुत्रासोयत्रपितरोभवन्तिमानोमध्यारीरिषतायुर्गन्तोः ९ अदिति
२ द्यौरदितिरन्तरिक्षमदितिर्मातासपितासपुत्रः॰ विश्वेदेवाऽअदितिःपञ्चज
नाऽअदितिर्जातमदितिर्जनित्वम॰॥ १० ॥ ॥ इतिस्वस्तिवाचनम॰॥ ॥

२

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ कलसस्थापनम् ॥ २

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ भूरसि० इति भूमिं संशोध्य। ॐ धान्यमसि० इति धान्यं संस्थाप्य।

॥ क.स्था. ॥ श्रीगणेशायनमः॥ अथकलशस्थापनम्॥ वेद्यांईशानकोणेअव्रणंताम्रादिधातुविनिर्मितंमृ
॥१॥ राम्नयंवावहिर्दध्यक्षतचन्दनभूषितंवस्त्राच्छन्नंकलशपात्रंसप्तधान्योपरिस्थापयेत्। प्रथमं
भूमिस्पर्शः। ॐमहीद्यौःपृथिवीचनइमंयज्ञंमिमिक्षतांपिपृतान्नोभरीमभिः। अथयवप्रक्षे
पः। ॐओषधयःसमवदन्तसोमेनसहराज्ञायस्मैकृणोतिब्राह्मणस्तꣳराजन्पारयामसि
अथपात्रस्थापनम्। ॐआजिघ्रकलशंमह्यात्वाविशन्त्विन्दवः।पुनरूर्जानिवर्त्तस्वसानःस
हस्रंधुक्ष्वोरुधारापयस्वतीपुनर्माविशताद्रयिः। अथजलेनापूरणम्। ॐवरुणस्योत्त ॥ राम.॥
म्भनमसिवरुणस्यस्कम्भसर्जनीस्थो वरुणस्यऋतसदन्यसिवरुणस्यऋतसदन्य ॥१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सि वरुणस्यऋतसदनमसिवरुणस्यऋतसदनमासीद• अथकुशब्राह्मणंस्थापयेत्•
ॐआब्रह्मन्ब्राह्मणोब्रह्मवर्चसीजायतामाराष्ट्रेराजन्यः शूरइषव्योऽतिव्याधीमहार
थोजायतां दोग्ध्रीर्धेनुर्वोढानड्वानाशुःसप्तिःपुरन्ध्रिर्योषाजिष्णूरथेष्ठाः सभेयोयु
वास्ययजमानस्यवीरोजायतां निकामेनिकामेनःपर्जन्योऽभिवर्षतुफलवत्योनऽ
ओषधयःपच्यन्तां योगक्षेमोनःकल्पताम् ॐब्रह्मयज्ञानमितिमन्त्रेणच• अथगन्ध
म• ॐगन्धद्वारांदुराधर्षांनित्यपुष्टांकरीषिणीम्॥ ईश्वरींसर्वभूतानांतामिहोपह्वयेश्रियं
म॥ अथदूर्वा• ॐकाण्डात्काण्डात्प्ररोहन्तीपरुषःपरुषस्परि॥ एवानोदूर्वेप्रतनुसहस्रेण

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

||क.स्था.|| शतेनच ॥ अथसर्वौषधि:हरिद्रावा॰ ॐयाओषधीःपूर्वाजातादेवेभ्यस्त्रियुगंपुरा॥ मनै
||२|| नुबभ्रूणामहं७शतंधामानिसप्तच॰ अथपूगीफलम्॰ ॐयाःफलिनीर्याअफलाअ
पुष्पायाश्चपुष्पिणीः॥ बृहस्पतिप्रसूतास्तानोमुञ्चन्त्व७हसः॰ अथदुग्धम्॰ ॐपयः
पृथिव्यांपयओषधीषुपयोदिव्यंतरिक्षेपयोधाःपयस्वतीःप्रदिशःसन्तुमह्यम्॰ अथ
दधि॰ ॐदधिक्राव्णोअकारिषंजिष्णोरश्वस्यवाजिनः॥ सुरभिनोमुखाकरत्प्रणऽआ
यूं७षितारिषत्॰ अथघृतम्॰ ॐघृतवतीभुवनानामभिश्रियोर्वीपृथ्वीमधुदुघेसुपे ||रामः||
शसा द्यावापृथिवीवरुणस्यधर्म्मणाविष्कभितेअजरेभूरिरेतसा॰ अथपञ्चपल्लवाः॰ ||२||

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नथ
अश्वत्थेवोनिषदनं पर्णेवोवसतिष्कृता ॥ गोभाजइत्किलासथयत्सनॅपूरुषम् ॥ अथसप्तमृ
द. ॐस्योनापृथिविनो भवानृक्षरानिवेशनी ॥ यच्छानःसर्म्मसप्रथाः ॥ अथपश्चात्ना
नि. ॐपरिवाजपतिःकविरग्निर्हव्यान्यक्रमीत् । दधद्रत्नानिदाशुषे ॥ अथहिरण्यद्रव्यं
वा. ॐहिरण्यगर्भःसमवर्त्ततागेभूतस्यजातःपतिरेकआसीत् ॥ सदाधारपृथिवींद्यामु
तेमांकस्मैदेवायहविषाविधेम ॥ अथगन्धम् ॥ ॐयदश्वायवासउपस्तृणान्त्यधीवासं
याहिरण्यान्यस्मै ॥ सन्दानमर्वन्तंपड्वीशंप्रियादेवेष्वायामयन्ति ॥ अथोपरिधान्यपूर्ण
पात्रम्. ॐपूर्णादर्विपरापतसुपूर्णापुनरापतवस्नेवविक्रीणावहाइषमूर्जं ७ शतक

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

|| कस्या ||
|| ३ ||

तो॰ ततोवरुणावाहयेत॰ ॐ तत्वायामिब्रह्मणावन्दमानस्तदाशास्तेयजमानोहविर्भिः ॥ अ
हेडमानोवरुणेह बोध्युरुश ॰ समानआयुः प्रमोषीः॰ अथकलशाभिमन्त्रणम्॰ क
लशस्यमुखेविष्णुः कण्ठेरुद्रः समाश्रितः ॥ मूलेतस्यस्थितोब्रह्मामध्येमातृगणाः स्थिताः ॥
कुक्षौतुसागराः सप्त सप्तद्वीपावसुन्धरा ॥ ऋग्वेदोथयजुर्वेदः सामवेदोह्यथर्वणः ॥ अङ्गैश्चसः
हिताः सर्वेकलशंतुसमाश्रिताः ॥ अथप्रार्थना ॥ देवदानवसंवादेमथ्यमानेमहोदधौ ॥ उ
त्पन्नोसितदाकुम्भविधृतोविष्णुनास्वयम् ॥ त्वत्तोयेसर्वतीर्थानिदेवाः सर्वेत्वयिस्थिताः ॥ || राम: ||
त्वयितिष्ठन्तिभूतानित्वयिप्राणाःप्रतिष्ठिताः ॥ शिवः स्वयंत्वमेवासिविष्णुस्त्वञ्चप्रजापतिः ॥ || ३ ||

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आदित्यावसवोरुद्राविश्वेदेवामरुद्गणाः॥ त्वयितिष्ठन्तिसर्वेऽपियतःकामफलप्रदः॥ त्वत्प्रसा
दादिमंयज्ञंकर्त्तुमीहेजलोद्भव॥ सान्निध्यंकुरुमेदेवप्रसन्नोभवसर्वदा॥ ॐस्थिरोभववी
ड्वंगआशुर्भववाज्यर्व्वन्॥ पृथुर्भवसुषदस्त्वमग्नेः पुरीषवाहणः। [illegible]ःस्त
न्तइतिप्रतिष्ठा ॐभूर्भुवःस्वः कलशेआवाहिताः ब्रह्मवरुणसहितआदित्यादिनवग्रहाः
साङ्गाःसपरिवाराःसायुधाःसवाहनाः साधिप्रत्यधिदेवताःइन्द्रादिदशदिक्पालविनाय
कादिपञ्चलोकपालसहिताःसुप्रतिष्ठितावरदाभवन्तु॰ ततोघंसंस्थाप्यप्राणायामंकृत्वापू
जासंकल्पः॰ ओंद्येहेत्यादिअमुकराशिरमुकशर्म्माहं अमुककर्म्मनिमित्तकं कलशे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ क॰ स्था॥
॥ ४॥

आवाहितानांब्रह्मवरुणसहितादित्यादिनवग्रहाणं साधिप्रत्यधिदेवतेन्द्रादिदिक्पालानां
पूजनंकरिष्ये॰ पद्मासनःपद्मकरोद्विवाहुरित्यादिश्लोकैर्ध्यानंविधाय॰ ॐआकृष्णेनेत्यादि
वेदमन्त्रैर्नाममन्त्रैर्वा॰ आवाहनासनपाद्यादीन्समर्पयेत्॰ ॐब्रह्मणेनमः॥ ॐवरुणायनमः
ॐआदित्यायनमः॥ ॐसोमायनमः॥ ॐभौमायनमः॥ ॐबुधायनमः॥ ॐबृहस्पतयेनः
मः॥ ॐशुक्रायनमः॥ ॐशनैश्चरायनमः॥ ॐराहवेनमः॥ ॐकेतुभ्योनमः॥ ॐअधिदेव
ताभ्योनमः॥ ॐप्रत्यधिदेवताभ्योनमः॥ ॐइन्द्रादिदशदिक्पालेभ्योनमः॥ ॐविनायकादि रामः
पंचलोकपालेभ्योनमः॥ इतिनाममन्त्रैःपाद्यादिभिःराजनांनंसंपूज्य॰ पुष्पाञ्जलिः ब्रह्मा ४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मुरारिस्त्रिपुरान्तकारीभानुःशशीभूमिसुतोबुधश्च ॥ गुरुश्चशुक्रःशनिराहुकेतवःसर्व्वे
ग्रहाःशान्तिकराभवन्तु ॥ सूर्य्यःशौर्य्यमथेन्दुरुच्चपदवींसन्मङ्गलंमङ्गलः सद्बुद्धिंचबुः
धोगुरुश्चगुरुतांशुक्रःशुभंशंशनिः ॥ राहुर्वाहुवलंकरोतुसततंकेतुःकुलस्योन्नतिं
नित्यंप्रीतिकराभवन्तुममतेसर्व्वेऽनुकूलाग्रहाः ॥ आयुश्चवित्तंचतथासुखंच धर्म्मार्थलाभौ
वहुपुत्रतांच ॥ शत्रुक्षयंराजसुपूजितांच तुष्टाग्रहाक्षेमकराभवन्तु ॥ इतिपुष्पाञ्जलिंसम
र्प्य दक्षिणासङ्कल्पः ॥ अद्येह अमुकशर्म्माहं अमुककर्म्मणिकलशेआवाहितानांब्रह्म
वरुणसहितादित्यादिनवग्रहाणांसाधिप्रत्यधिदैवतेन्द्रादिलोकपालानांपूजायाःसा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ङ्ग॰फलप्राप्तये साद्गुण्यार्थं चेमां दक्षिणां आदित्यादिनवग्रहाणां प्रीतये ब्राह्मणाय
दास्ये॰ ॐ तत्सन्नमम॰ इति दक्षिणां दत्वा अभिषेकतिलकमंत्रपाठादिकारयेत् ॥
इति कलशस्थापनम्॰ तदङ्गत्वेन नवग्रहपूजनं च ॥ समाप्तम् ॥ शुभम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

॥ गणेशपूजा ॥ २

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रीगणेशायनमः॥ अथगणेशपूजा॥ दीपंप्रज्वाल्यंकर्मकुर्य्यात्कर्त्ताकर्मदिनेप्रात
रुत्थायस्नात्वाअहतेधौतेवाससीपरिधायनित्यकर्मसमाप्यसर्व्वकर्मणः प्रधानभूतंग
णेशपूजनंकुर्य्यात् · प्रथमंगणेशायपुष्पाञ्जलिंसमर्पयेत् · सुमुखश्चैकदन्तश्चकपि
लोगजकर्णकः॥ लंबोदरश्चविकटोविघ्ननाशोविनायकः॥ धूम्रकेतुर्गणाध्यक्षोभालच
न्द्रोगजाननः॥ द्वादशैतानिनामानियःपठेच्छृणुयादपि॥ विद्यारंभेविवाहेचप्रवेशेनिर्ग
मेतथा॥ संग्रामेसंकटेचैवविघ्नस्तस्यनजायते॥ विघ्नवल्लीकुठारायगणाधिपतयेन ॥ रामः॥
मः॥ ततोविष्णुं, शुक्लांवरधरंविष्णुंशशिवर्णंचतुर्भुजम्॥ प्रसन्नवदनंध्यायेत्सर्वविघ्नो ॥१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

घ्नोपशान्तये॥ लाभस्तेषां जयस्तेषां कुतस्तेषां पराजयः॥ येषामिन्दीवरश्यामो हृदयस्थो
जनार्द्दनः॥ पुनर्गणेशं प्रणामेत्॥ वक्रतुण्ड महाकाय सूर्य्यकोटिसमप्रभ॥ अविघ्नं
कुरु मे देव सर्वकार्य्येषु सर्वदा॥ इति नमस्कृत्य अर्घस्थापनं कुर्यात्॥ चन्दनेन भूमौ त्रि
कोणावृत्त चतुरस्र मण्डलं लिखित्वा गन्धाक्षतपुष्पैः संपूज्य अर्घं संस्थाप्य जलेनापूर्य॥
गंगे च यमुने चैव गोदावरि सरस्वति॥ नर्मदे सिन्धु कावेरि जलेस्मिन् सन्निधिं कुरु॥ इ
त्यंकुशमुद्रया तीर्थमावाह्य गन्धाक्षतपुष्पादि निक्षिप्य प्रथमं सूर्य्यार्घं दद्यात्॥ ताम्रस्था
ल्यां सूर्य्यं लिखित्वा ध्यानम्॥ अरुणोरुणपंकजे निषण्णः कमलेऽभीतिवरौ करै र्दधानः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

||ग.पू.||
||२||

स्वरुचाहितमंडलंस्त्रिनेत्रोरविराकल्पशताकुलोवतान्नः॥ इतिध्यात्वाअर्घंदद्यात्॥ एहिसूर्य्यसहस्रांशोतेजोराशेजगत्पते॥ अनुकंपयमांभक्त्यागृहाणार्घंदिवाकर॥ इत्यर्घंदत्वासर्षपाक्षतैर्भूतोत्सादनंकुर्य्यात्॥ अपक्रामन्तुभूतानिपिशाचाःसर्वतोदिशम्॥ सर्वेषामविरोधेनब्रह्मकर्मसमारभेत्॥ पाखंडकारिणोभूताभूमौयेचांतरिक्षगाः॥ दिविलोके स्थितायेचतेनश्यंतुशिवाज्ञया॥ निर्गच्छंतुचभूतानांवर्त्मदद्यात्स्ववामतः॥ इतिमंत्रैर्भूतोत्सादनंकुर्य्यात्॥ वामपार्ष्णिघातत्रयेणाछोटिकाभिस्तालत्रयेणचसर्वान्विघ्नानुत्सार्य॥ आधारशक्त्यैपृथिव्यैनमः॥ कमलासनायनमः॥ इत्यासनंसंपूज्यपुनरर्घंसंस्था

||राम:||
||२||

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्यजलेनापूर्य्यगन्धाक्षतपुष्पादिंनिक्षिप्यतेनजलेनात्मानंगणेशपूजासामग्रींसंप्रोक्ष्य
प्राणायामंविधायतिलकुशयवजलान्यादायपूजासंकल्पंकुर्यात्॥ ॐ विष्णुः३नमःप
रमात्मनेश्रीपुराणपुरुषोत्तमायॐतत्सदद्यपृथिव्यांजम्बूद्वीपेभारतखण्डेआर्य्यावर्त्ते
पुण्यक्षेत्रेहिमवत्पर्वतैकदेशेब्रह्मणोद्वितीयपरार्द्धेश्रीश्वेतवाराहकल्पेकृतत्रेताद्वापरा
न्तेसम्पन्नेवैवस्वतमन्वन्तरेअष्टाविंशतितमेकलियुगस्यप्रथमचरणेषष्ठ्यब्दानांमध्ये
अमुकनामसम्वत्सरेअमुकायनेअमुकऋतौअमुकमासेअमुकपक्षेअमुकपुण्य
तिथौअमुकगोत्रोऽमुकराशिरमुकशर्माहंश्रुतिस्मृतिपुराणोक्तफलप्राप्तयेकरि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ग.पू.॥
॥३॥

थमाराग्नुककर्मनिमित्तकंनिर्विघ्नतासिद्ध्येभगवतोगरोशस्यषोडशोपचारैःपूजनं
करिष्ये॥इतिसंकल्प्यपीठपूजनंकुर्यात्॥ ॐतीव्रायैनमः॥ ॐज्वालिन्यैनमः॥ ॐनन्दा
यैनमः॥ ॐभोगदायैनमः॥ ॐकामरूपिण्यैनमः॥ ॐसत्यायैनमः॥ ॐउग्रायैनमः॥
ॐतेजोवत्यैनमः॥ ॐमध्येविघ्ननाशिन्यैनमः॥ ॐसर्वशक्तिकमलासनायनमः॥
ध्यानम्॥एकदन्तंसूर्पकर्णंगजवक्त्रंचतुर्भुजम्॥ पाशांकुशधरंदेवंध्यायेत्सिद्धिविनाय
कम्॥ आवाहनम्॥ विनायकनमस्तेस्तुउमामलसमुद्भव॥ इमांमयाकृतांपूजांगृहा
णसुरसत्तम॥ आसनम्॥ नानारत्नसमायुक्तंमुक्ताहारविभूषितम्॥ स्वर्णसिंहास

॥रामः॥
॥३॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नैवारुप्रीत्यर्थंप्रतिगृह्यताम् ॥ पाद्यम् ॥ गौरीप्रियनमस्तेस्तुशङ्करप्रियसर्वदा ॥ भक्त्या
पाद्यंमयादत्तंगृहाणप्रणतप्रिय ॥ अर्घम् ॥ व्रतमुद्दिश्यदेवेशगन्धपुष्पाक्षतैर्युतम्
गृहाणार्घंमयादत्तंसर्वसिद्धिप्रदोभव ॥ स्नानम् ॥ स्नानंपश्चामृतैर्देवगृहाणगणना
यक ॥ अनाथनाथसर्वज्ञगीर्वाणपरिपूजित ॥ ॐगणानान्त्वागणपति७हवामहे
प्रियाणान्त्वाप्रियपति७हवामहे निधीनान्त्वानिधिपति७हवामहे वसोममआ
हमजानिगर्ब्भधमात्वमजासिगर्ब्भधम् ॥ श्रीगणेशस्नानम् ॥ स्नानंगमाचमनी
यंचदत्वावस्त्रम् ॥ रक्तवस्त्रयुगंदेवंदेवाङ्गसदृशप्रभम् ॥ भक्त्यादत्तंगृहाणेदंलंबो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उरस्हर प्रिय॥ यज्ञोपवीतम्॥ राजतंब्रह्मसूत्रंचकाञ्चनस्योत्तरीयकम्॥ गृहाणचा॰
रुसर्व्वेशभक्तानांसिद्धिदायक॥ गन्धम्॥ गन्धंकर्पूरसंयुक्तंदिव्यंचन्दनमुत्तमम्॥
विलेपनंसुरश्रेष्ठप्रीत्यर्थंप्रतिगृह्यताम्॥ अक्षता॥ अक्षताश्चधवलाःदेवसुरगन्धर्वपू
जिता॥ सर्व्वदेवनमस्कार्यगृहाणमदनुग्रहात्॥ पुष्पाणि॥ सुगन्धीनिसुपुष्पाणिमा
लत्यादीनिवैप्रभो॥ मयानीतानिपूजार्थंपुष्पाणिप्रतिगृह्यताम्॥ धूपः॥ दशाङ्गंगुग्गु
लंधूपंसुगन्धिंसुमनोहरम्॥ उमासुतनमस्तुभ्यंधूपंमेप्रतिगृह्यताम्॥ दीपः॥ गृहाण॰
शमङ्गलंदीपंघृतवर्त्तिसमन्वितम्॥ दीपंज्ञानप्रदंदेवरुद्रप्रियनमोस्तुते॥ नैवेद्यम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अमुकगोत्रः
अमुकप्रवरः
अमुकशर्माहं

सगुणान्सघृतांश्चैव मोदकान्घृतपाचितान् ॥ नैवेद्यं सफलं दत्तं गृह्यतां विघ्ननाश
न ॥ इत्येकं मोदकं विनायकाय समर्पयामि ॥ भूषणार्थं द्रव्यं समर्पये मूलमन्त्रेणाजपविधा
यसमर्प्य ॥ ताम्बूलम् ॥ पूगीफलसमायुक्तं नागवल्लीदलान्वितम् ॥ कर्पूरादि
समायुक्तं ताम्बूलं प्रतिगृह्यताम् ॥ दशमोदकदानसङ्कल्पः ॥ अद्येहामुकोहं
अमुककर्मनिमित्तकं गणेशप्रीतये इमान्दशमोदकान्दक्षिणासहितान्ब्रा
ह्मणाय ददास्ये ॐ तत्सन्मम ॥ ब्राह्मणं गन्धादिना पुष्पैः सम्पूज्य ॥ मोदकदा
नमन्त्रः ॥ विघ्नेश विप्र विप्ररूपेण गृहाण दशमोदकान् ॥ दक्षिणाघृतताम्बूल

तत्कुमारस्य
---नाम्नः
अपनयनवेदा
रम्भसमावर्त्त
पूर्वाङ्ग

काश्यपगोत्रस्य
काश्यपावत्सा
रनैध्रुवेति त्रि
प्रवरस्य अस्म
द्यजमानस्य
---शर्मणः
प्राणेरितेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गुह्यगुह्यगोप्ता त्वं गृहाणास्मत्कृतं जपं। सिद्धिर्भवतु मे देव त्वत्प्रसादान्महेश्वर॥

गुड्युक्तान्ममेष्टद ॥ प्रतिग्रहमंत्रः ॥ दाता विघ्नेश्वरो देवो गृहीता सर्वविघ्नराट् ॥ त
स्मादिदं मया दत्तं परिपूर्णं तदस्तु मे ॥ प्रार्थना ॥ विनायक नमस्तुभ्यं सततं मोद
कप्रिय ॥ अविघ्नं कुरु मे देव सर्व्वकार्य्येषु सर्वदा ॥ अथदुर्वांकुरपुजा ॥ ॐ ग
णाधिप नमस्तेऽस्तु ॥ ॐ उमापुत्र नमस्तेस्तु ॥ ॐ अघनाशन नमस्तेस्तु ॥ ॐ वि
नायक नमस्तेस्तु ॥ ॐ ईशपुत्र नमस्तेस्तु ॥ ॐ सर्वसिद्धिप्रदायक नमस्तेस्तु ॥
ॐ एकदन्त नमस्तेस्तु ॥ ॐ इभवक्त्र नमस्तेस्तु ॥ ॐ मूषकवाहन नमस्तेस्तु ॥१
ॐ कुमारगुरो तुभ्यं नमोस्तु ॥ ॐ चतुर्थीश नमोस्तु ते ॥ ॐ काण्डात्काण्डात्प्ररोह

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

त्तीपरूषः परुषस्परि स्वानोदूर्वेप्रतनुसहस्रेणशतेनच ॥इतिदूर्व्वासमर्प्यनीराज
नंकुर्य्यात् ॥अन्तस्तेजोवहिस्तेजस्एकीकृत्यामितप्रभम् ॥आरार्त्तिकमिदंदेवगृ
हाणमदनुग्रहात् ॥ॐअग्निर्ज्ज्योतिर्ज्ज्योतिरग्निः स्वाहा· सूर्य्योज्योतिर्ज्ज्यो
तिःसूर्य्यःस्वाहा· अग्निर्वर्च्चोज्योतिर्व्वर्चःस्वाहा· सूर्य्योवर्च्चोज्योतिर्व्वर्च्चःस्वा
हासूर्य्योऽज्योतिःज्योतिःसूर्य्यःस्वाहा ॥इतिनीराजपुष्पाञ्जलिः ॥सुमुखश्चै
कदन्तश्चकपिलोगजकर्णकः ॥लम्बोदरश्चविकटोविघ्ननाशोविनायकः ॥धूम्र
केतुर्गणाध्यक्षोभालचन्द्रोगजाननः ॥द्वादशैतानिनामानियःपठेच्छृणुयादपि

विद्यारम्भे विवाहे च प्रवेशे निर्गमे तथा ॥ सङ्ग्रामे सङ्कटे चैव विघ्नस्तस्य न जायते.

॥ग.पू.॥ ॥विघ्नवल्लीकुठाराय गणाधिपतये नमः॥ अविरलमदजलनिवहं भ्रमरकुला

॥६॥ नीकसेवितकपोलम् ॥ अभिमतफलदातारं कामेशं गणपतिं वन्दे ॥ इति नम

स्कृत्य. दक्षिणासङ्कल्पं कुर्यात् ॥ अद्येत्यादि देशकालसंकीर्तनान्ते अमुको

हं अमुककर्मणि निर्विघ्नतासिद्ध्यर्थे भगवतो गणेशस्य पूजाकर्मणः साद्गुण्यार्थं इ

दं दक्षिणां ब्राह्मणाय ददास्ये ॐ तत्सत् न मम ॥ इति दक्षिणादान ॥ ॐ गणानां ॥रामः॥

त्वा गणपतिꣳ हवामहे प्रियाणां त्वा प्रियपतिꣳ हवामहे निधीनां त्वा निधिप ॥६॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ति७ हवामहे वसोमम॥ आहमजानि गर्भधमात्वमजासि गर्भधम्॥ इति न
श्चाशिषंदद्यात्॥ इति गणेशपूजा॥ समाप्तम्॥ शुभम्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथब्राह्मणवरणम् ४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ब्रा·व· श्रीगणेशायनमः अथमण्डपप्रवेशः गीतवाद्यपुरःसरंसपरिवारोयजमा
१ नोहस्ताभ्यांकलशादिकंगृहीत्वा· स्वस्तिवाचनपुरःसरंमंत्रंपठन्· त्रिभिर्म
ण्डपंप्रदक्षिणीकृत्य· पश्चिमद्वारेणप्रविशेत्· तत्रमंत्रः भद्रंकर्णेभिःशृणु
यामदेवाः भद्रंपश्येमाक्षभिर्यजत्राः· स्थिरैरङ्गैस्तुष्टुवांसस्तनूभिर्व्यशेम
हिदेवहितंयदायुः इतिमण्डपप्रवेशविधिः· अपक्रामन्तुभूतानिपिशाचाः
सर्वतोदिशम्· सर्वेषामविरोधेनब्रह्मकर्मसमारभे· इतिगौरसर्षपान्विकी
र्य· शुचीवोहव्यामरुतःशुचीनांशुचिंहिनोम्यध्वरंशुचिभ्यः· ऋतेनसत्यम् १

तमापआयशुचिजन्मानःशुचयःपावकाः १ अंशोय्यामरुतःस्वादयोनोव
क्षःमुरुक्रमाऽउपशिश्रियाणाः· निविद्युतोनऋष्टिभिरुचानाऽअनुस्वधा
मायुधैर्यच्छमानाः २ प्रबुध्नावऽइतेरेमहांसिपुनानाभिप्रयज्यवाविरध्वं
सहस्त्रियन्दम्यंभागमेतंगृहमेधीयंमरुतोजुषध्वम्· ३ आपोहिष्ठामयोभुव
स्तानऽउर्ज्जेदधातनः महेरणायचक्षसे· १ इतिभूमिंप्रोक्ष्य· स्वस्त्ययनंमं
त्रद्वयंजपेत्· इति· अथब्राह्मणवरणमधुपर्कविधिः कुशतिलयवजल
युतगन्धपुष्पाक्षतपूगीफलवस्त्राङ्गुलीयादीन्यादायप्राङ्मुखोभूत्वा·संक

श्रा·व· ल्पंकुर्यात्· ॐ तत्सत् ३ विष्णुः ३ श्रीमद्भगवतो महापुरुषस्य विष्णोराज्ञया प्र
२ वर्त्तमानस्य ब्रह्मणो द्वियप्रहरार्धे श्वेतवाराहकल्पे वैवस्वतमन्वन्तरे ऽष्टा
विंशति पर्यये कलियुगप्रथमचरणे जम्बूद्वीपे भरतखण्डे भारतवर्षे आर्या·
वर्त्तान्तर्गतामुकक्षेत्रे ऽमुकनगरे· ग्रामे वा· इहपुण्यभूमौ षष्टि संवत्सराणां
मध्ये ऽमुकसंवत्सरे श्रीसूर्ये ऽमुकायने ऽमुकर्तौ सौरेण चान्द्रेण ऽमुकमा
से ऽमुकपक्षे ऽमुकवासरान्वितायाममुकतिथौ· यथानक्षत्रयोगकरण
लग्नान्वितायां· अमुकराशिस्थे श्रीसूर्ये ऽमुकराशिस्थे देवगुरौ· अमुक २

राशिस्थेचन्द्रे· अन्येषुग्रहेषुयथास्थानस्थितेषुसत्सु· एवंग्रहगुणगणविशे
षविशिष्टायांतिथौ· अमुकगोत्रोऽमुकराशिरमुकशर्माहंममाऽमुक॰
कर्मणिनिर्विघ्नपरिसमाप्त्यर्थंगणेशपूजार्थं· तथायद्यज्ञारंभेयद्विहित
कर्मोपयोग्याचार्यकर्मकर्त्तुंतथाकृताकृतावेक्षणरूपब्रह्मकर्मकर्त्तुं· त
था· विधिदर्शनरूपसदस्यकर्मकर्त्तुंतथा· प्रतिदेवानांमुखेसाज्यभागा
नामाहवनीयद्रव्यहोमकर्मकर्त्तुंतथाचतुर्वेदोक्तमंत्रपारायणजपकर्म
कर्त्तुंनानानामगोत्रान्नानानामशर्मणोब्राह्मणान्नेभिश्चन्दनपूगीफल

ब्रा·व· पुष्पाक्षतवस्त्रांगुलीयादिभिर्गणपतिब्रह्मासदस्यहोतृऋत्विकद्वारपाल
३ जापकत्वेनपरिचारकत्वेनचयुष्मानहंवृणे· वृतास्मेतिप्रत्युक्तिः अथ
वाप्रत्येकम्· इतिसंकल्प्य· गंधादिभिर्गणेशंसंपूज्य· मदीययज्ञेगणप
तित्वेनत्वामहंवृणे· वृतोस्मीतिप्रत्युक्तिः प्रार्थयेत्· देवानामसुराणां
चयज्ञेषाकपूजितस्तुयः निर्विघ्नंकुरुतेयद्वत्त्वंमेगणपतिर्भव· भवामि
इतिप्रत्युक्तिः ततः आचार्यंसंपूज्य· ममास्मिन्यज्ञेत्वामाचार्यत्वेनाहंवृणे·
वृतोस्मीति॰ प्रार्थना· आचार्यत्वेयथास्वर्गेशक्रादीनांबृहस्पतिः तथात्वं ३

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ममयज्ञेस्मिन्नाचार्योभवसुव्रत· भवामीति॰ ततोब्रह्माणंसंपूज्य· ममाऽमु
कयज्ञेब्रह्मत्वेनत्वामहंवृणे· वृतोस्मीति॰ प्रार्थना· यथाचतुर्मुखोब्रह्मास
र्ववेदविशारदः· तथात्वंममयज्ञेस्मिन्ब्रह्माभवद्विजोत्तम· भवामीति॰ त
तःसदस्यंसंपूज्य· ममास्मिन्यज्ञेसदस्यत्वेनत्वामहंवृणे· वृतोस्मीति॰ प्रा
र्थना· यथाविश्वसृजोयज्ञेयाज्ञवल्क्योद्विजोत्तमः तथात्वंममयज्ञेस्मि·
न्सदस्योभवसुव्रत· भवामीति॰ ततोहोतारमृत्विजंसंपूज्य· ममास्मिन्य
ज्ञेहोतृत्वेनआर्त्विक्त्वेनचत्वामहंवृणे· वृतोस्मीति॰ प्रार्थना· भगवन्स

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ब्रा·व· वेधर्मज्ञसर्वधर्मविदांवर· वित्तेनममयज्ञेस्मिन्नृत्विक्त्वंमेमखेभव· भ
वामीति० एवमन्यानपि· ततोद्वारपालंसंपूज्य· ममास्मिन्यज्ञेऋग्वेद
४ सूक्तपारायणार्थंद्वारपालत्वेनत्वामहंवृणे· वृतोस्मीति० प्रार्थना· ऋग्
वेदपद्मपत्राक्षोगायत्रःसोमदैवतः अत्रिगोत्रजविप्रेन्द्रऋत्विक्त्वंमे
मखेभव· भवामीति० ततोन्यंद्वारपालंसंपूज्य· ममास्मिन्यज्ञेयजुर्वेद
सूक्तपारायणार्थंद्वारपालत्वेनत्वामहंवृणे· वृतोस्मीति० कातराक्षो
यजुर्वेदस्त्रैष्टुभोविष्णुदैवतः काश्यपेयजविप्रेन्द्रऋत्विक्त्वंमेमखेभव· ४

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भवामीति० ततोन्यंद्वारपालंसंपूज्य· ममास्मिन्यज्ञेसामवेदसूक्तपारा
यणार्थंद्वारपालत्वेनत्वामहंवृणे· वृतोस्मीति० प्रार्थना· सामवेदस्तुपिं
गाक्षोजागतःशक्रदैवतः भारद्वाजस्तुविप्रेन्द्रऋत्विक्त्वंमेमखेभव· भ
वामीति० ततोन्यद्वारपालंसंपूज्य· ममास्मिन्यज्ञेअथर्ववेदसूक्तपाराय
णार्थंद्वारपालत्वेनत्वामहंवृणे: वृतोस्मीति० प्रार्थना· वृहन्नेत्रोथर्ववे
दोनुष्टुभोरुद्रदैवतः वैशम्पायविप्रेन्द्रऋत्विकत्वंमेमखेभव· भवामी
ति० ततोजापकंसंपूज्य· ममास्मिन्यज्ञेऋग्वेदमंत्रजापकार्थंजापकत्वे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

श्रा·न· त्वामहं वृणे· वृतोस्मीति॰ प्रार्थना· ऋग्वेदः पठेति· भवामीति॰ ततो
५ न्यं जापकं संपूज्य· ममाऽस्मिन्यज्ञे यजुर्वेदमंत्रजपकर्मकर्तृजापकत्वेन त्वा
महं वृणे· वृतोस्मीति॰ प्रार्थना· कातराक्षो॰ भवामीति॰ ततोन्यं जापकं
सम्पूज्य· ममास्मिन्यज्ञे सामवेदमंत्रजपकर्मकर्तृजापकत्वेन त्वामहं वृणे·
वृतोस्मीति॰ प्रार्थना· सामवेदस्तु॰ भवामीति॰ ततोन्यजापकं संपूज्य· म
मास्मिन्यज्ञेऽथर्ववेदमंत्रजपकर्मकर्तृजापकत्वेन त्वामहं वृणे· वृतोस्मी॰
प्रार्थना· वृहस्पतेत्रो॰ भवामीति॰ ततः परिचारकादींश्च पूजयेत्· ॥ इति॥ ५

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ब्राह्मणवरणं॥ ततोमधुपर्कादिनापूजयेत् तद्यथा षडर्घ्याभवन्तीति
आचार्यऋत्विग्वैवाह्योराजाप्रियःस्नातकःप्रतिसंवत्सरानर्हयेयुः आसनमा
हार्याहेतिसूत्रम् अथप्रयोगः साधुभवानास्तामित्यस्यप्रजापतिऋषिर्य
जुर्ब्रह्मादेवताअर्चनेविनियोगः ॐ साधुभवानास्तामर्चयिष्यामोभवन्तं
इतियजमानोब्रूयात् ॐ अर्चयेतिप्रत्युक्ते ॐ विष्टरोविष्टरोविष्टरः इत्य
न्येनोक्ते यजमानोविष्टरमादाय ॐ विष्टरःप्रतिगृह्यतां इतिवदेत् ॐ
विष्टरंप्रतिगृह्णामीत्यभिधाय विष्टरंगृहीत्वा ॐ वर्ष्मोस्मीत्याथर्वणः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ग्रा॰व॰ ऋषिर्वशिष्ठोदेवताऽनुष्टुप्छन्दआत्मस्तुतिपूर्वकोपवेशनेविनियोगः ॐ व
६ र्ष्मोऽस्मिसमानानामुद्यतामिवसूर्यः इमन्तमभितिष्ठामियोमाकश्चाभिदा
सति· इत्यनेनासनोपरिविष्टरमुत्तराग्रं दत्वाउपविशति· ततोयजमानः
पाद्यमञ्जलिनादाय· ॐ पाद्यं ३ इत्यन्येनोक्ते यजमानः ॐ पाद्यंप्रतिगृह्य
तामितिवदेत्· ॐ पाद्यंप्रतिगृह्णामीत्यभिधाय· यजमानाञ्जलिनोपा
द्यमादाय· ॐ विराजोदोहोसीतिप्रजापतिऋषिरापोदेवतायजुःपदप्र
क्षालनेविनियोगः· ॐ विराजोदोहोसिविराजोदोहमशीयमयिपाद्या ६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यैविराजोदोहः॰ इतिमंत्रेणार्घ्यो क्षत्रियश्चेद्वामपादपूर्वं दक्षपादं प्रक्षाल
यति॰ अनेनैवमंत्रेण वामपादमपि॰ ततः विष्टरो विष्टरो विष्टरः इत्यन्येर
नोक्ते॰ ॐ विष्टरःप्रतिगृह्यताम्॰ इतियजमानेनोक्ते॰ पूर्ववद्यजमानहस्ता
द्विष्टरान्तरंगृहीत्वा॰ वर्ष्मोस्मीतिमंत्रेण चरणयोरधस्तादुत्तराग्रं निदधा
ति॰ ततो दूर्वाक्षतफलचन्दनजलयुतार्घपात्रंगृहीत्वा॰ ॐ अर्घो र्घो र्घः
इत्यन्येनोक्ते यजमानः ॐ अर्घःप्रतिगृह्यतामितिवदेत्॰ ततोर्घ्यः॰ ॐ अ
र्घं प्रतिगृह्णामीत्यभिधाय॰ यजमानहस्तादर्घंगृहीत्वा॰ ॐ आपःस्थेतिप्र

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मधु. जापतिऋषिरापोदेवतायजुरर्घग्रहणेविनियोगः. ॐ आपःस्थयुष्माभिःस
७ र्वांकामानवाप्नवानि. इत्यनेनअर्घंगृहीत्वाशिरसाऽभिवन्द्यभूमौनिनय
न्नभिमंत्रयेत्समुद्रंवइतिमंत्रेण. समुद्रंवइत्यस्याथर्वणऋषिरनुष्टुप्छ
न्दआपोदेवताऽर्घप्रक्षेपणेविनियोगः ॐ समुद्रंवःप्रहिणोमिस्वांयो(
निमभिगच्छत. अरिष्टास्माकंवीरामापरासेचिमत्पयः ॐ आचमनीयं
आचमनीयंआचमनीयं. इत्यन्येनोक्ते. ॐ आचमनीयंप्रतिगृह्यता
मितियजमानोवदेत्. ततोर्घ्यः ॐ आचमनीयंप्रतिगृह्णामीत्यभिधाय ७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यजमानहस्तादाचमनीयमादायाऽर्घ्ये आचमनं करोतीत्यनेन मंत्रेण· ॐ
मागन्निति परमेष्ठि ऋषिर्बृहती छन्द आपो देवताऽऽचमने विनियोगः ॐ
आमागन्यशसासᳯ सृज वर्चसा तं म्माकुरु प्रियं प्रजानामधिपतिं पशूना
मरिष्टिं तनूनाम्· तत्सदाचामति· विष्टरुलीम्· नमो यजमानः कांस्यपात्र
स्थदधिमधुघृतानि कांस्यपात्रपिहितान्यादाय· ॐ मधुपर्को मधुपर्को
मधुपर्कः इत्यन्येनोक्ते· ॐ मधुपर्कः प्रतिगृह्यतां· इति यजमानो वदे
त· ननोऽर्घ्यः ॐ मधुपर्कं प्रतिगृह्णामीत्यभिधाय· ॐ मित्रस्य त्वेति प्रजा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

म॰पु॰ पतिरृषिःपङ्क्तिश्छन्दोमित्रोदेवतामधुपर्कावेक्षणेविनियोगः ॐ मित्रस्य
८ त्वाचक्षुषाप्रतीक्षे· इतिमंत्रेणाञ्जकरस्थंमधुपर्कंनिरीक्ष्य ॐ देवस्य
त्वेतिपरमेष्ठीऋषिर्गायत्रीछन्दःसवितादेवतामधुपर्कग्रहणेविनियो
गः ॐ देवस्य त्वासवितुःप्रसवेऽश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्याम्प्रतिगृह्णा
मि· इत्यनेनयजमानहस्तान्मधुपर्कंगृहीत्वा· वामहस्तेधृत्वा· ॐ नमः
श्यावेतिप्रजापतिऋषिर्यजुःसवितादेवतामधुपर्कालोडनेविनियोगः
ॐ नमःश्यावास्यायान्नशनेयतआविद्धंतत्तेनिष्कृन्तामि· इतिमंत्रेण ८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रमहलानामिकयाप्रदक्षिणमालोड्यानामिकाङ्गुष्ठाभ्यांकिंचिद्भूमौनिः
क्षिपेत्· पुनस्तथैवद्विवारम्· ततः ॐ यन्मधुनइतिकुत्सऋषिर्जगतीछ
न्दोमधुपर्कोदेवतामधुपर्कप्राशनेविनियोगः ॐ यन्मधुनोमधव्यंपर
म९० रूपमन्नाद्यम्· तेनाहंमधुनोमधव्येनपरमेणरूपेणान्नाद्येनपर
मोमधव्योन्नादोसानि· इत्यनेनमधुपर्कप्राशनंत्रिवारम्· प्रतिप्राशने
मंत्रपाठः मधुवातेतित्र्यृचामधुपर्कप्राशनम्वा· अनामिकाङ्गुष्ठाभ्यांप्रा
शित्वा· पुत्रायशिष्यायवादद्यात्· सर्वंवाभक्षयेत्· असञ्चरदेशेपूर्वं·

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्यांदिशिवास्थापयेत्· ततआचम्य· ॐ वाङ्मइत्यादीनांमन्त्राणांपरमेष्ठी
 ऋषिर्दैवीगायत्रीछन्दः परमात्मादेवताप्राणस्पर्शनेविनियोगः कराग्रेण·
ॐ वाङ्मआस्येस्तु· इत्यास्ये· तर्जन्यङ्गुष्ठाभ्यां· ॐ नसोर्मेप्राणोस्तु· इतिनसोः
अनामिकाङ्गुष्ठाभ्यां· ॐ अक्ष्णोर्मेचक्षुरस्तु· इतिनेत्रयोः अनामिकाङ्
गुष्ठाभ्यां· ॐ कर्णयोर्मेश्रोत्रमस्तु· इतिकर्णयोः तथैव· ॐ बाह्वोर्मेबलम
स्तु· इतिबाह्वोः युगपत्स्थलेन· ॐ ऊर्वोर्मेओजोस्तु· इत्यूर्वोः उभाभ्यांहस्ता
भ्याम्· ॐ अरिष्टानिमेङ्गानितनूस्तन्वामेसहसन्तु· इतिशिरःप्रभृतिपाद

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मधु. न्नानिसर्वगात्राणिस्पृष्ट्वा· ॐ गौर्गौर्गौः इतियजमानेनोक्ते· ॐ मातारुद्रा

१० णामितिब्रह्माऋषिर्गौर्देवतात्रिष्टुप्छन्दोगोरभिमंत्रणेविनियोगः ॐ मा

तारुद्राणांदुहितावसूनांस्वसादित्यानाममृतस्यनाभिः॥ प्रनुवोचंचि

कितुषेजनायमागामनागामदितिंवधिष्ट· ममचामुष्यामुकशर्मणो

यजमानस्यपाप्माहतः ॐ इतिउपांशुपठित्वा· उत्सृजततृणान्यत्तु·

इत्युच्चस्वरेणोक्त्वातृणमुत्सृजेत्· ॥ ॥ इतिमधुपर्कविधिः॥ ॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथपुराणाह्याचनविधिः ५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पु.वा. अथ पुण्याहवाचनविधिः पुरो द्वि चतुरो ब्राह्मणानुत्तरमुखानासंस्थाप्य · कुशाक्षतिल
१ यवजलगन्धाक्षतपुष्पपूगवस्त्रद्रव्यं गृहीत्वा · अद्येहामुकगोत्रोऽमुकशर्माहं मम
ऽमुककर्मणि पुण्याहवाचनार्थं गन्धाक्षतपुष्पपूगीफलवस्त्रद्रव्यादिभिर्युष्मा
नहं वृणे · ते ब्राह्मणाः वृताः स्मेति ब्रूयुः गन्धादिभिर्चनं ब्राह्मणानां वरणं कृत्वा ·
ह्सेकलशं धारयन्ति केचिच्छिष्टाः अञ्जलिं बध्वा पठेत् · ब्राह्मं पुण्यं महद्यच्च सृष्ट्यु
त्पादनकारकम् · वेदवृक्षोद्भवं नित्यं तत्पुण्याहं ब्रुवन्तु नः · अद्येहाऽमुकगोत्रस्यामुक
प्रवरस्यामुकशर्मणो मम गृहेऽमुककर्मणि भो ब्राह्मणाः पुण्याहं भवन्तो ब्रुवन्तु ३ इति त्रिः १

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पठेत् । ॐ पुण्याहम् ३ इति ब्रूयुः ॐ पुनन्तु मा देवजनाः पुनन्तु मनसा धियः पुनन्तु
विश्वा भूतानि जातवेदः पुनीहि मा । स्वस्तिर्या अविनाशाख्या लोककल्याणसिद्धि
दा । विनायकप्रियानित्यं ता नः स्वस्त्ययोब्रुवन्तु मे । अद्येहाऽमुकगोत्रस्याऽमुकप्रवर
स्याऽमुकशर्मणो मम गृहेऽमुककर्मणि भो ब्राह्मणाः स्वस्ति भवन्तो ब्रुवन्तु ३ इति गिः
पठेत् । ॐ स्वस्ति ३ इति ब्रूयुः ॐ स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः
स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु । सागरस्य तु या ऋद्धि
र्महालक्ष्म्यादिभिः कृता । संपूर्णा सुप्रभावा च तां च ऋद्धिं ब्रुवन्तु नः । अद्येहामुक

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

प्र.का. गोत्रस्यामुकप्रवरस्यामुकशर्मणोममगृहेऽमुककर्मणिभोब्राह्मणाः ऋद्धिंभव
२ न्तोब्रुवन्तु· ३ इतित्रिःपठेत्· ॐ ऋध्यताम्· ३ इतिब्रूयुः ॐ सत्रस्यऋद्धिरस्यगन्म·
ज्योतिरमृताऽअभूम· दिवंपृथिव्याअध्यारुहामाविदामदेवान्स्वर्ज्योतिः वैधृ
तौचव्यतीपातेसंक्रान्तौराहुपर्वणि· याऋद्धिमवाप्नोतितांचऋद्धिंब्रुवन्तुनः अ
घेऽमुकगोत्रस्यामुकप्रवरस्यामुकशर्मणोममगृहेऽमुककर्मणिभोब्राह्मणाः
पुष्टिंभवन्तोब्रुवन्तु ३ इतित्रिःपठेत्· ॐ पुष्यताम्· ३ इतिब्रूयुः ॐ ज्यैष्ठ्यंचमऽआ
धिपत्यंचमेमन्युश्चमेभामश्चमेऽमश्चमेऽम्भश्चमेजेमाचमेमहिमाचमेवरिमाचमे २

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रथिमा च मे वर्षिमा च मे द्राघिमा च मे वृद्धं च मे वृद्धिश्च मे यज्ञेन कल्पन्ताम्॥ पृथि
व्यामुद्धृतायान्तु यत्कल्याणं पुरा कृतम्। ऋषिभिर्देवगन्धर्वैस्तत्कल्याणं ब्रुवन्तु
नः॥ अद्येहामुकगोत्रस्यामुकप्रवरस्यामुकशर्मणो मम गृहेऽमुककर्मणि भो ब्रा
ह्मणाः कल्याणं भवन्तो ब्रुवन्तु ३ इति त्रिः पठेत्॥ ॐ कल्याणम् ३ इति ब्रूयुः॥ ॐ य
थेमां वाचं कल्याणीमावदानि जनेभ्यः। ब्रह्मराजन्याभ्यां शूद्राय चार्याय च स्वा ३०
य चारणाय च। प्रियो देवानां दक्षिणायै दातुरिह भूयासमयं मे कामः समृध्यतां
सरित्पतेश्च या कन्या या श्रीर्विष्णुगृहे स्थिता। सर्वसौख्यवती लक्ष्मीस्तां श्रियं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पुश्रा चवुवन्तु नः। अद्येहामुकगोत्रस्याऽमुकप्रवरस्याऽमुकशर्मणो मम गृहेऽमुककर्म
३ णि भो ब्राह्मणाः श्रीरस्त्विति भवन्तो ब्रुवन्तु ३ इति त्रिः पठेत्। ॐ श्रीरस्तु ३ इति ब्रूयुः
ॐ मनसः काममाकूतिं वाचः सत्यमशीय। पशूनां रूपमन्नस्य रसो यशः श्रीः
श्रयतां। यः क्षमरदिपत्तौ यथा शान्तिर्भुधरातले। तथा च देवदेवानां तां च शान्
तिं ब्रुवन्तु नः। अद्येहामुकगोत्रस्यामुकप्रवरस्यामुकशर्मणो मम गृहेऽमुकक
र्मणि भो ब्राह्मणाः शान्तिं भवन्तो ब्रुवन्तु। ३ इति त्रिः पठेत्। ॐ शान्तिः ३ इति ब्रूयुः
ॐ द्यौः शान्तिरन्तरिक्षं शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः॥ व ३

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पुण्या॰ नस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्मशान्तिः सर्वं शान्तिः शान्तिरेवशा
४ न्तिः सामाशान्तिरेधि॰ पुण्याहवाचनसमृद्धिरस्तु ॥ इति पठित्वा ॥ यज
मानाय प्रसादं दद्युः ॥ ॥ इति पुण्याहवाचनविधिः ॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथमातृकापूजा· ६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मा॰पू॰ श्रीगणेशाय नमः [वैदिककार्ये मातृकापूजावश्यकमाह शातातपः अनिष्ट्वा
१ पितृयज्ञेन वैदिकं किंचिदाचरेत्· तत्रापि मातरः पूर्वं पूजनीयाः प्रयत्नतः अकृ
त्वा मातृयागं तु वैदिकं यः समाचरेत्· तस्य क्रोधसमाविष्टा हिंसामिच्छन्ति
मातरः इति· भविष्यपुराणे मातर उक्ताः गौरी पद्मा शची मेधा सावित्री विज
या जया · देवसेना स्वधा स्वाहा मातरो लोकमातरः [illegible] धृतिः पुष्टिस्तथा तुष्टि
रात्मनः कुलदेवतेति· छन्दोगपरिशिष्टे· कर्मादिषु च सर्वेषु मातरः सगण
धिपाः पूजनीयाः प्रयत्नेन पूजिताः पूजयन्ति ता· इति] अथ प्रयोगः कर्तोपवि १

३प· आचम्य· कुशादीन्यादाय· अद्येह मम करिष्यमाणाऽमुककर्मनिर्वि
घ्नपरिसमाप्त्यर्थं नरकुंजरत्या गणपतिसहितगौर्यादिषोडशमातृणामावाह
नस्थापनपूजनमहं करिष्ये· इति संकल्प्य· दीपंकलशंशंखंपूज्य· पीठिका
यामक्षतपुञ्जेषु वा· गणानान्त्वा गणपतिᳪ हवामहे प्रियाणान्त्वा प्रियप
तिᳪ हवामहे निधीनान्त्वा निधिपतिᳪ हवामहे वसो मम· ॐ भूर्भुवः स्वः ग
णपते इहागच्छ इह तिष्ठ· ॐ गौरीर्मिमाय सलिलानि तक्षती· ॐ भूर्भुवः स्व
: गौरि इहागच्छ इह तिष्ठ· ॐ भूर्भुवः स्वः पद्मे इहागच्छ इह तिष्ठ· ॐ भूर्भुवः स्वः

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शचिइहागच्छेहतिष्ठ॰ ॐ भूर्भुवःस्वः मेधेइहागच्छेहतिष्ठ॰ ॐ भूर्भुवःस्वः
सावित्रिइहागच्छेहतिष्ठ॰ ॐ भूर्भुवःस्वः विजयेइहागच्छेहतिष्ठ॰ ॐ भूर्भु
वःस्वःजयेइहागच्छेहतिष्ठ॰ ॐ भूर्भुवःस्वः देवसेनेइहागच्छेहतिष्ठ॰ ॐ
भूर्भुवःस्वः स्वधेइहागहागच्छेहतिष्ठ॰ ॐ भूर्भुवःस्वः स्वाहेइहागच्छेहति
ष्ठ॰ ॐ भूर्भुवःस्वः मातरइहागच्छंतेहतिष्ठत॰ ॐ भूर्भुवःस्वः लोकमातरइहा
गच्छंतेहतिष्ठत॰ ॐ भूर्भुवःस्वः धृतेइहागच्छेहतिष्ठ॰ ॐ भूर्भुवःस्वः पुष्टेइ
हागच्छेहतिष्ठ॰ ॐ भूर्भुवःस्वः तुष्टेइहागच्छेहतिष्ठ॰ ॐ भूर्भुवःस्वः आत्म

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नः कुलदेवते इहागच्छेह तिष्ठ· मनोजूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमि
मन्तनोत्वरिष्टं यज्ञं समिमन्दधातु· विश्वेदेवास इह मादयन्तामो३म्प्र
तिष्ठ· इति प्रतिष्ठाप्य· ॐ गणपतये नमः १ ॐ गौर्यै नमः २ ॐ पद्मायै नमः
३ ॐ शच्यै नमः ४ ॐ मेधायै नमः ५ ॐ सावित्र्यै नमः ६ ॐ विजयायै नमः
७ ॐ जयायै नमः ८ ॐ देवसेनायै नमः ९ ॐ स्वधायै नमः १० ॐ स्वाहायै नमः
११ ॐ मातृभ्यो नमः १२ ॐ लोकमातृभ्यो नमः १३ ॐ धृत्यै नमः १४ ॐ पुष्ट्यै
नमः १५ ॐ तुष्ट्यै नमः १६ ॐ आत्मनः कुलदेवताभ्यो नमः (हरात्मजचतुर्वी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मा॰पू॰ होवारणास्यमहोदर॰ प्रसन्नोभवमह्यंत्वंगौरीपुत्रनमोस्तुते॥१ चन्द्रास्ये
३ चन्द्रकलयाविभूषितकपालके॰ प्रसन्नाभवमह्यंत्वंशिवगौरीनमो॰ २
दुग्धोदसंभवेभव्येसरोजोपरिसंस्थिते॰ प्रसन्नाभवमह्यन्त्वंहरिपत्नि॰
३ सदासौभाग्यसंयुक्तेमन्दारकुसुमार्चिते॰ प्रसन्नाभवमह्यंत्वंशचीदेवी
॰४ शुक्लाम्बरधरेदेवीवीणापुस्तकधारिणी॰ सर्वप्राणहृदिस्थात्वंमेधा:
देव्यै॰५ त्रिसंध्यंदेविभक्तानांवन्दनीयासुशोभने॰ प्रसन्नाभवमह्यंत्वंसा
वित्रित्वांनमाम्यहम्॰६ चारुणाश्वभपश्चेनराजमानेर्कसंनिभे॰ प्रसन्ना ३

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भवमह्यंत्वंविजयायेनमाम्यहम्· ७ अनेकवर्णसंयुक्तेनानाशास्त्रसमन्वि
ते· प्रशन्नाभवमह्यंत्वंजयादेव्यै॰ ८ सौभाग्ययुक्तेसौभाग्यदायिकेदुःखव॥
र्जिते· प्रशन्नाभवमह्यंत्वंदेवसेने॰ ९ पितृणांवल्लभेशान्तेशान्तियुक्तेशुभं
करे· प्रसन्नाभवमह्यंत्वंस्वधेदेवि॰ १० सप्तार्चिवल्लभेसप्तस्वरसंतानसंयुते·
प्रसन्नाभवमह्यंत्वंस्वाहेदेवि॰ ११ वराभयकराभव्याःप्रसन्नमुखपङ्कजाः·
सुप्रसन्नाःप्रजायन्तांमातृभ्योवैनमोनमः १२ रक्षकाःसर्वलोकानांनिन्तरां
लोकमातरः सुप्रसन्नाःप्रजायन्तांमह्यंताभ्योनमोनमः १३ इतिसंजनिके॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

[illegible] ग्रं: - ५९ -

मा॰पू॰ धैर्ययुक्तेसर्वसमर्चिते · प्रसन्नाभवमह्यंत्वंधृत्यैदेव्यै॰ १४ सर्वेसांपुष्टिजनि
४ केपूर्णकामसमन्विते· प्रसन्नाभवमह्यंत्वंपुष्टिदेव्यै॰ १५ सर्वसन्तोषजनि
केसन्तोषेणसमन्विते · प्रसन्नाभवमह्यंत्वंतुष्टिदेव्यै॰ १६ कुलदेविमहाभा
गेकुलाद्दिकृतकेतने· प्रसन्नाभवमह्यंत्वंकुलदेव्यैनमोस्तुते· १७ इतिप्रत्ये
कमातृप्रार्थना। केचित्तुभित्तौगोमयपिण्डे ब्राह्मीमाहेश्वरीकौमारीवैष्णवी
वाराहीइन्द्राणीचामुण्डामातृणांपूजनंकृत्वा · तत्रैववसोर्धारांकुर्वन्ति · पाद्या
र्घ्याचमनीयस्नानीयपंचामृतमधुपर्कस्नानीयवस्त्राभूषणगन्धाक्षतपुष्पधू ४

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पदीपनैवेद्याचमनीयफलोपायनद्रव्यनीराजनाभिः सम्पूज्य । गौरीपद्मा
शचीमेधासावित्रीविजयाजया । देवसेनास्वधास्वाहामातरो लोकमातरः ॥ धृ
तिपुष्टिस्तथातुष्टिरात्मनः कुलदेवताः गणेशेनाधिका ह्येता मह्यं यच्छन्तु मं
गलं ॥ २ ॥ आत्मादीन् प्रार्थयेत् । ब्रह्माणी कमलेन्दुसौम्यवदना माहेश्वरी लील
या कौमारी रिपुदर्पनाशनकरी चक्रायुधा वैष्णवी । वाराही घनघोरघर्घरमु
खी चैन्द्री च वज्रायुधा चामुण्डा गणनाथरुद्रसहिता रक्षन्तु नो मातरः ॥ १ ॥ इति
पुष्पाञ्जलिं दद्यात् । ततो यजमानपत्नीपक्वान्नादिकमादाय भर्त्तुः शिरसि नि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मा·पू· धाप्य· भन्नीतप्रेष्टेनेनभिनीलग्राः पंचसप्तवावसोर्धाराः कुर्यादेभिर्मंत्रैः ॐ
५ वसोःपवित्रमसिशतधारं वसोःपवित्रमसिसहस्रधारम्· देवस्त्वासवितापु
नातुवसोःपवित्रेणशतधारेणसुप्वाकामधुक्षः नाꣳसवितुर्वरेण्यस्याचि
त्रामाहंवृणेसुमतिंविश्वजन्याम्· यामस्यकण्वोअदुहत्प्रपीनाꣳसहस्रधा
रांपयसामहींगाम्· कण्वोहैनांददर्शसाहास्मैसहस्रधाराःसर्वान्कामान्दुदुहे
तथैवैतद्यजमानायसहस्रधाराःसर्वान्कामान्दुदुहे· इति· द्यौःशान्तिरन्तरिक्ष
ꣳशान्तिःपृथिवीशान्तिरापःशान्तिरोषधयःशान्तिः· वनस्पतयःशान्तिर्वि ५

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पूजिता: मातर: क्षमध्वम्.

श्वेदेवा: शान्तिर्ब्रह्मशान्ति: सर्वं॰ शान्ति: शान्तिरेवशान्ति: सामाशान्तिरे
धि॰ इतिजलाञ्जलिम्॰ (आवाहनंनजानामिनजानामिविसर्जनम्॰ पूजांचै
वनजानामिक्षमस्वंमातृदेवता:) इतिक्षमाप्य॰ मङ्गलकार्यसमाप्तौविसर्जये
त्॰॥ इतिमातृकापूजाविधि:॥ ॥मण्डपसत्वेस्थूलविधिनाकर्त्तव्यम्॰॥ ॥
गोमयपिण्डेअदित्यादि १६ तद्यथा॰ अदितिर्देवमाताचह्रीःस्वासिद्धि:सरस्व
ती॰ कीर्तिर्लक्ष्मीर्धृतिर्मेधापुष्टि:श्रद्धाक्रियामति:बुद्धिर्लज्जावपु:शान्तिरेता
गोमयमातर:॥ ॥गौर्यादिनोरणमातर: १० गौरीपद्मशचीनन्दाविमलामङ्

मा॰पू॰ लाबला॰ गङ्गाचयमुनाधात्रीविधात्रीतोरणाम्बिका॰ इतितोरणपूज्या॰॥ ॥
६ नन्दादिद्वारमातरः॰७ नन्दानन्दिनिधासिद्धीवसुदेवाचभार्गवी॰ जयाचविः
जयाचैवसप्तैता द्वारमातरः॥ द्वारेपूज्या॰॥ ॥ गौर्यादिषोडशमातरः १६ गृ
हाभ्यन्तरेपूज्या॰॥ ॥ ब्राह्म्यादिसप्तमातरः ७ भित्तोपटे फलके पूज्या॰॥ इति
॥ ॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ मातृकापूजा. १
पत्र ६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मातृ॰ श्रीगणेशाय नमः॥ ॥मातृकापूजाविधिः॥ ॥कर्त्ता उपविश्य
१ आचम्य कुशादीन्यादाय अद्येह काश्यपगोत्रस्य
मम करिष्यमाण उपनयनकर्म निर्विघ्नसमाप्त्यर्थं गदङ्गतया गण
पति सहित गौर्यादि षोडश मातॄणाम् आवाहनस्थापनपूजनान्यहं क
रिष्ये इति संकल्प्य पीठिकायामक्षतपुञ्जेषु वा गणानान्त्वा
गणपतिं हवामहे प्रियाणान्त्वा प्रियपतिं हवामहे निधीनान्त्वा रामः
निधिपतिं हवामहे व्वसोमम ॐ भूर्भुवः स्वः गणपते इहागच्छ १

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इहतिष्ठ ॥ ॐ गौरीर्मिमाय सलिलानि [illegible]तक्षयानि ॥ ॐ भूर्भुवः स्वः गौरि इहागच्छ इहतिष्ठ ॥ ॐ भूर्भुवः स्वः पद्मे इहागच्छ इह तिष्ठ ॥ ॐ भूर्भुवः स्वः शचि इहागच्छ इहतिष्ठ ॥ ॐ भूर्भुवः स्वः मेधे इहागच्छ इह तिष्ठ ॥ ॐ भूर्भुवः स्वः सावित्रि इहागच्छ इहतिष्ठ ॥ ॐ भूर्भुवः स्वः विजये इहागच्छ इह तिष्ठ ॥ ॐ भूर्भुवः स्वः जये इहागच्छ इह तिष्ठ ॥ ॐ देवसेने इहागच्छ इहतिष्ठ ॥ ॐ भूर्भुवः स्वः स्वधे इहागच्छ इह तिष्ठ ॥ ॐ भूर्भुवः स्वः स्वाहे इहागच्छ इहतिष्ठ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मातृ· ॐ मातरः इहागच्छत इहतिष्ठत ॥ ॐ भूर्भुवः स्वः लोकमातर इहाग
च्छत इहतिष्ठत ॥ ॐ भूर्भुवः स्वः धृते इहागच्छ इहतिष्ठ ॥ ॐ भू
२ र्भुवः स्वः पुष्टे इहागच्छ इहतिष्ठ ॥ ॐ तुष्टे इहागच्छ इहतिष्ठ ॥
ॐ भूर्भुवः स्वः आत्मनः कुलदेवते इहागच्छ इहतिष्ठ ॥ मनोजूति
र्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमन्तनोत्वरिष्टं यज्ञꣳ समिमन्दधातु ।
विश्वेदेवास इह मादयन्तामो३म्प्रतिष्ठ । इति प्रतिष्ठाप्य । ॐ गणपत रामः
येनमः ॐ गौर्यैनमः ॐ पद्मायैनमः ॐ शच्यैनमः ॐ मेधायैनमः २

१= पाद्यं समर्पयामि । गणपति सहित गौर्यादि षोडश मातृभ्यो नमः । इति । [illegible]

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ सावित्र्यैनमः ॐ विजयायैनमः ॐ जयायैनमः ॐ देवसेनायै
नमः ॐ स्वधायैनमः ॐ स्वाहायैनमः ॐ मातृभ्योनमः ॐ लोकमा
तृभ्योनमः ॐ धृत्यैनमः ॐ पुष्ट्यैनमः ॐ तुष्ट्यैनमः ॐ आत्मनः
कुलदेवतायैनमः ॥ चन्द्रास्ये चन्द्रकलया विभूषितकपालके प्रसन्ना
भव मह्यं त्वं शिवगौरि नमोस्तुते १ ॥ दुग्धोदसंभवे भव्ये सरोजे परिसंस्थि
ते ॥ प्रसन्ना भव मह्यं त्वं [illegible] नमोस्तुते २ ॥ सदा सौभाग्यसंयुक्ते म
न्दारकुसुमार्चिते ॥ प्रसन्ना भव मह्यं त्वं [illegible]विवे[illegible] नमोस्तुते ३ ॥ शुक्लां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मातृ
२

वरदे देवी वीणापुस्तकधारिणी ॥ सर्वप्राणहृदिस्था त्वं मेधादेव्यै नमो
स्तुते ॥४॥ त्रिसन्ध्यं देवि भूतानां वन्दनीया सुशोभने ॥ प्रसन्ना भव मह्यं त्वं
सावित्रि त्वां नमाम्यहम् ॥५॥ चारुणा शुभपद्मेन राजमानेर्कसन्निभे ॥ प्र
सन्ना भव मह्यं त्वं विजयायै नमो नमः ॥६॥ अनेकवर्णसंयुक्ते नानाशा
स्त्रसमन्विते ॥ प्रसन्ना भव मह्यं त्वं देवसेने नमाम्यहम् ॥७॥ पितृणां वह्नि
भे शान्ते शान्तियुक्ते शुभंकरि ॥ प्रसन्ना भव मह्यं त्वं स्वधे देवि नमोस्तु एम्हः
ते ॥८॥ सप्तार्चिर्वह्निभे सप्तस्वरसन्तानसंयुते ॥ प्रसन्ना भव मह्यं त्वं स्वाहे दे २

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विनमोस्तुते ॥ ८ वराभयकरा भव्याः प्रसन्नमुखपङ्कजाः ॥ सुप्रसन्नाः प्र
जायन्तां मातृभ्यो वै नमोनमः ॥ १० रक्षकाः सर्वलोकानां निमरालोकमातरः
सुप्रसन्नाः प्रजायन्तां मह्यं ताभ्यो नमोनमः ॥ ११ धृतिसंजनिके धैर्ययुक्ते
सर्वसमन्विते ॥ प्रसन्ना भव मस्यं त्वं धृत्यै देव्यै नमोनमः ॥ १२ सर्वेषां पुष्टि
जनिके सर्वकामसमान्विते ॥ प्रसन्ना भव मह्यं त्वं पुष्टिदेव्यै नमोनमः ॥ १३
सर्वसन्तोषजनिके सन्तोषेण समन्विते ॥ प्रसन्ना भव मह्यं त्वं तुष्टिदेव्यै न
मोस्तुते ॥ १४ कुलदेवि महाभागे कुलाद्रिकृन्तकेनने ॥ प्रसन्ना भव मह्यं त्वं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पाद्यं समर्पयामि ब्राह्म्यादि
सप्तमातृभ्यो नमः ॥ इति सर्वे ॥

मातृ॰ कुलदेव्यै नमो नमः ॥ इति प्रत्येक मातृप्रार्थना ॥ भित्तौ गोमयपिष्टे ब्रा
४ ह्मी माहेश्वरी कौमारी वैष्णवी वाराही इन्द्राणी चामुण्डा मातृणां पूज
नं कृत्वा तथैव वसोर्धारां कुर्वीत ॥ पाद्यार्घ्याचमनीयस्नानीयपञ्चा
मृतमधुपर्कस्नानीयवस्त्राभरणगन्धाक्षतपुष्पधूपनैवेद्याचमनीयफ
लोपायनद्रव्यनीराजनादिभिः संपूज्य गौरी पद्मा शची मेधा सावि
त्री विजया जया देवसेना स्वधा स्वाहा मातरो लोकमातरः ॥ धृतिः पु गणपः
ष्टिस्तथा तुष्टिरात्मनः कुलदेवताः ॥ गणेशेनाधिका ह्येता वृद्धौ पूज्याश्च ४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नु मङ्गलम् ॥ ब्राह्म्यादीन्प्रार्थयेत् ॥ ब्रह्माणी कमलेन्दुसौम्यवदना
माहेश्वरी लीलया कौमारी रिपुदर्पनाशनकरी चक्रायुधा वैष्णवी ॥
वाराही घनघोरघर्घरमुखी चैन्द्री च वज्रायुधा चामुण्डा गणनाथ
रुद्रसहिता रक्षन्तु नो मातरः ॥ इति पुष्पाञ्जलिं दद्यात् ॥ ततेन
घृतेन भित्तौ लग्नाः पंच सप्त वा वसोर्धाराः कुर्यादेभिर्मन्त्रैः ॥ ॐ
वसोः पवित्रमसि शतधारं वसोः पवित्रमसि सहस्रधारम् ॥ देवस्त्वा
सविता पुनातु वसोः पवित्रेण शतधारेण सुप्वा कामधुक्षः ॥ नाँस

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वितुर्वरेण्यस्य चित्रामाहं वृणे सुमतिं विश्वजन्याम्॥ यामस्य कण्वो अ
दुहत्प्रपीनां सहस्रधारां पयसा महीं गाम्॥ कण्वो हैनां ददर्श साह
स्मै सहस्रधाराः सर्वान्कामानुदुहे। तथैवैते यजमानाय सहस्रधाराः
सर्वान्कामानुदुहे॰ इति॥ द्यौः शान्तिरन्तरिक्षꣳ शान्तिः पृथिवी शा
न्तिरापः शान्तिरोषधयः शान्तिः। वनस्पतयः शान्तिर्विश्वेदेवाः शा
न्तिर्ब्रह्म शान्तिः सर्वꣳ शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि॥
इति जप्त्वा प्रणाम्य॰ पूजिता मातरः क्षमध्वम्॥ इति क्षमाप्य॰ मङ्ग

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लकार्यसमाप्तौ विसर्जयेत्॥ ॥इति मातृकापूजाविधिः॥ ॥
शुभम्॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथसंकल्पाभ्युदयिकश्राद्धं 6

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नां·श्रा· श्रीगणेशायनमः संकल्पवृद्धिश्राद्धविधिः [वृद्धिश्राद्धकालमाहतुर्वोपदेवकाला
१ दर्शौ· सीमन्तव्रतचौलनामकरणान्नप्राशनोपायनस्नानाधानविवाहयज्ञतन
योत्पत्तिप्रतिष्ठासु च· पुंसूत्यावसथप्रवेशनसुताद्यास्याऽवलोकाश्रमस्वीकार
क्षितिपाभिषेकदयितनाद्यर्तौ चनान्दिमुखम्· मात्स्ये· देववृक्षजलादीनांप्रतिष्ठा
यांविशेषतः तीर्थयात्रावृषोत्सर्गेवृद्धिश्राद्धंप्रकीर्तितम्· पिण्डदानविकल्पमु
क्तंभविष्ये· पिण्डनिर्वपणंकुर्यान्नवाकुर्याद्विचक्षणः वृद्धिश्राद्धकलाचारोदेश
कालाद्यपेक्ष्यहि· इति· आश्वलायनपरिशिष्टे· युग्मब्राह्मणाःअमूलादर्भाः १

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्राङ्मुखेभ्य उदङ्मुखो दद्यादुदङ्मुखेभ्यः प्राङ्मुखो वा · कात्यायनः आभ्युदयिके प्र
दक्षिणमुपचारः पित्र्यमंत्रवर्जं जपः ऋजवो दर्भाः यवैस्तिलार्थः संपन्नमिति तृ
प्तिप्रश्नो न स्वधां प्रयुंजीत युग्मानाशयेत् · अथ प्रयोगः प्राङ्मुख उदङ्मुखो वा भू
त्वा · आचम्य · दीपं प्रज्वाल्य · संपूज्य · ॐ यद्देवा देवहेडनं देवासश्चकृमा वयम् ।
अग्निर्मा तस्मादेनसो विश्वान्मुञ्चत्वꣳहसः यदि दिवा यदि नक्तमेनाꣳसि चकृमा
वयं · वायुर्मा तस्मादेनसो विश्वान्मुञ्चत्वꣳहसः यदि जाग्रद्यदि स्वप्न एनाꣳसि च
कृमा वयम् · सूर्यो मा तस्मादेनसो विश्वान्मुञ्चत्वꣳहसः अनेन मंत्रेण कर्म पात्रं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

काश्यपगोत्राणाम् अस्मत्पितृपितामहप्रपितामहानां सेढुप्रतापविक्रम दुलकविक्रम सुरेन्द्रविक्रम
वर्मणां यथायोग्य सपत्नीकानां
काश्यपगोत्राणां अस्मन्मातामहप्रमातामहवृद्धप्रमातामहानां गुहार्सिंह श्यामसिंह नानासिंह
वर्मणां

नां॰श्रा॰ स्वदक्षभागेस्थापयेत्॰ कुशदूर्वादिन्निक्षिप्य॰ गन्धादीन्तस्मीन्निक्षिपेत्॰ कुशत्रय
२ सहितंजलमादाय॰ अपवित्रःपवित्रोवासर्वावस्थांगतोपिवा॰ यःस्मरेत्पुण्डरीकाक्षं
सबाह्याभ्यंतरःशुचिः॰ पुण्डरीकाक्षायनमः इतितज्जलेनसामग्रीमात्मानंचसंप्रो
क्ष्य॰ कुशस्थानेदूर्वाद्वयं॰ कुशादीन्यादाय॰ अद्येत्याद्यमुकगोत्राणामस्मन्मातृपिता
महीप्रपितामहीनाममुकि अमुकी अमुकीनाम्नीदेवीनां तथाऽमुकगोत्राणाम
स्मन्मातृपितामहप्रपितामहानाममुकामुकामुकशर्मणांसपत्नीकानांनान्दीमु
खानांवसुसत्यसंज्ञकविश्वेदेवपूर्वकाणाममुककर्मांगतयाभ्युदयिकश्राद्धमेभि २

कर्मोत्गोव:

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ईश्मैरहंकरिष्ये· देवताभ्यःपितृभ्यश्चमहायोगिभ्यएवच· नमःस्वाहायैस्वाहायै
नित्यमेवनमोनमः इतित्रिःपठित्वा· कुशयवान्मादाय· अग्निष्वात्ताःपितृगणाः
प्राचींरक्षन्तुमेदिशाम्· अपहता असुरारक्षांसिवेदिषदः तथाबर्हिषदः पा
न्तुयाम्यांयेपितरःस्थिताः· अपहता॰ प्रतीचीमाज्यपास्तद्वत्पान्तुयेपितरःस्थिताः
अपहता॰ उदीचीमपिसोमपाःपान्तुयेपितरःस्थिताः· अपहता॰ ऊर्ध्वतस्त्वर्य
मारक्षेत्कव्यवाडनलोप्यधः· रक्षोभूतपिशाचेभ्यस्तथैवासुरदोषतः· सर्वतश्चा
भिपत्नेयांयमोरक्षांकरोतुमे· इतिमंत्रेणपूर्वादिदिक्षुयवान्विकीर्य· त्वमग्नेद्युभि॰

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नां·श्रा· त्वमाद्युश्युक्षणिस्त्वमग्नस्त्वमश्मनस्परि· त्वंवनेभ्यस्त्वमोषधीभ्यस्त्वंन्नृणांन्नृपतेजा
३ यतेशुचिः इतिमंगेराग्नीवीवन्धनं· कुशादीन्यादाय· अद्येहाऽमुकगोत्राणामस्मन्मा
काश्यप गोत्रा
त्रादित्रयसम्बन्धिनः) अस्मत्पित्रादित्रयश्राद्धसंवन्धिनः अमुकगोत्राणामस्मन्मा
तामहादित्रयश्राद्धसंवन्धिनोवसुसत्यसंज्ञकविश्वेदेवा इदमासनंवोनमः अद्येहाऽ
(मुकगोत्राणामस्मन्मातृपितामहिप्रपितामहीनाममुकीअमुकीअमुकीदेवीनां)
नान्दीमुखिनामाभ्युदयिकश्राद्धेइदमासनंवोनमः) अद्येहाऽमुकगोत्राणामस्मत्
पितृपितामहप्रपितामहानाममुकामुकामुकशर्माणां नान्दीमुखानामाभ्युदयिक ३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

श्राद्धे इदमासनं वो नमः अद्येहाऽमुकगोत्राणामस्मन्मातामहप्रमातामहवृद्धप्र
मातामहानाममुकामुकामुकशर्मणां नान्दीमुखानामाभ्युदयिकश्राद्धे इदमा
सनं वो नमः इति आसनं दत्वाः चतुरो ब्राह्मणान् गन्धादिभिः पूजयेत् · कुशादीन्मा
दाय · अद्येहास्मन्मात्रादित्रयपित्रादित्रयश्राद्धसंबन्धिनः अमुकगोत्राऽस्मन्मा
तामहादिश्राद्धसंबन्धिनो नान्दीमुखसंबन्धीनो वसुसत्यसंज्ञकविश्वेदेवा एतान्य
र्चनविधौ गन्धपुष्पादीनि वो नमः इति विश्वेदेवे दद्यात् · कुशादीन्मादाय · अद्ये
हाऽभ्युदयिकश्राद्धेऽमुकगोत्राः अस्मन्मातृपितामहीप्रपितामह्यः अमुकी अमु

नां॰श्रा॰ की अमुकी देव्यः नान्दीमुख्यः एतान्यर्चनविधौ गन्धपुष्पादीनि वो नमः॥ पुनः अद्ये
४ हाभ्युदयिकश्राद्धे ऽमुकगोत्राः अस्मत्पितृपितामहप्रपितामहाः अमुकामुकामुक
कशर्माणो नान्दीमुखा एतान्यर्चनविधौ गन्धादीनि वो नमः पुनः अद्येहाभ्युदयि
कश्राद्धे ऽमुकगोत्राः अस्मन्मातामहप्रमातामहवृद्धप्रमातामहाः अमुकामुकामुक
शर्मा नान्दीमुखाः एतान्यर्चनविधौ गन्धादीनि वो नमः इत्युत्सृजेत्। सोपस्करं
यवजलयुतमन्नपात्रं संपाद्य। कुशादीन्यादाय। इदमामान्नं सजलमेतन्नान्दीमुखा
मिपितृभ्यो नमः इत्यन्नं भूस्वामिने दद्यात्। अथान्नसंकल्पः सोपस्करं यवज ४

लयुतमन्नपात्रमालभ्य· पृथिवीते पात्रंद्यौरपिधानंब्राह्मणस्यमुखेअमृते
अमृतंजुहोमिस्वाहा· इदंविष्णुर्विचक्रमेत्रेधानिदधेपदं· समूढमस्यपांशु
सुरेस्वाहा· इदमन्नमित्यन्ने· इमाआप· इतिजले· इदमाज्यमितिघृते· इदंह
विरितिपुनरन्ने विप्रदक्षिणाङ्गुष्ठंनिवेश्य· यवोसियवयास्मद्द्वेषोयवयारा
तीः इतिअन्नपरितोयवान्विकीर्य· कुशादीन्यादाय· अद्येत्यादिअमुकर
श्राद्धे(अस्मन्मात्रादित्रयपित्रादित्रयमातामहादित्रयश्राद्धसंबन्धिभ्योवसु
सत्यसंज्ञकविश्वेभ्योदेवेभ्यइदमन्नंसोपस्करंवोनमः इतिभूमौउत्सृजेत्) ए

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ना॰श्रा॰ वंपात्रालंभनादिकं पूर्ववत्कृत्वा) कुशादीन्यादाय॰ अद्येहाऽभ्युदयिकश्राद्धे
५ ऽमुकगोत्राभ्यो मातृपितामहीप्रपितामहीभ्यो अमुकी अमुकी अमुकी देवी
भ्यो नान्दीमुखीभ्यो इदमन्नं सोपस्करं वो नमः) पुनः अद्येहाभ्युदयिकश्राद्धे
मुकगोत्रेभ्यो पितृपितामहप्रपितामहेभ्यो मुकामुकामुकशर्मभ्यो नान्दीमुखे
भ्यो इदमन्नं सोपस्करं वो नमः पुनः अद्येहाभ्युदयिकश्राद्धे मुकगोत्रेभ्यो स्म
न्मातामहप्रमातामहवृद्धप्रमातामहेभ्यो नान्दीमुखेभ्यो इदमन्नं सोपस्करं
वो नमः इति उत्सृज्य॰ अन्नहीनं क्रियाहीनं विधिहीनं च यद्भवेत्॰ तत्सर्वमच्छि ५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इमस्तुभास्करस्यप्रसादतः नमस्तुभ्यंविरूपाक्षनमस्तेनेकचक्षुषे · नमःपिनाक
हस्तायवज्रहस्तायवैनमः ततःसावित्रींजप्त्वा पुरुषसूक्तं मधुमतीःपंचचैव
जपेत् नीवींविस्रंसयेत् · ततोबदरामलकमूलकुशादीन्मादाय · अघेहाभ्यु
दयिकश्राद्धेमात्रादित्रयपित्रादित्रयमातामहादित्रयसंबन्धिवसुसत्यसंज्ञ
कवैश्वदेविकश्राद्धप्रतिष्ठासाङ्गतासिद्ध्यर्थमिमानिफलमूलादीनिवनस्पति
दैवतानिरजतादीनिचन्द्रदैवतानि यथानामगोत्राययथानामशर्मणेब्राह्मण
णायदातुमहमुत्सृजे · पुनः अघेहामुकगोत्राणामस्मन्मातृपितामहीप्रपि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नां·श्रा· नामहानाममुकीअमुकीअमुकीदेवीनान्नान्दीमुखीनान्तथाऽमुकगोत्राणाम
६ स्मत्पितृपितामहप्रपितामहानाममुकामुकामुकशर्म्मणांनान्दीमुखानान्तथाऽ
मुकगोत्राणामस्मन्मातामहप्रमातामहवृद्धप्रमातामहानाममुकामुकामुकश
र्म्मणांनान्दीमुखानाञ्चानेनदाभ्युदयिकश्राद्धप्रतिष्ठासिद्ध्यर्थमिमानिद्राक्षामल
कबदरमूलादीनिवनस्पतिदैवतानिरौप्यादीनिचन्द्रदैवतानियथानामगोत्रे
भ्योयथानामशर्म्मभ्योब्राह्मणेभ्योदातुमहमुत्सृजे· इतिदक्षिणांदत्वा· ॐ वाजेवाजेव
तवाजिनोनोधनेषुविप्राअमृताऋतज्ञाः अस्यमध्वःपिबतमादयध्वंतृप्तायात ६

नां·श्रा· पथिभिर्देवयानैः· इति पितृविसर्जनं कृत्वा· ॐ वसुसत्यसंज्ञकविश्वेदेवाः प्रीय
७ न्ताम्· इति विश्वेदेवविसर्जनम्· आचम्य· देवताभ्यः पितृभ्यश्च महायोगिभ्य ए
व च· नमः स्वाहायै स्वधायै नित्यमेव नमो नमः इति त्रिर्जपेत्· अस्मिन्निधीयत्कृ
तं तत्सुकृतमस्तु· यन्न कृतं तद्विष्णोः प्रसादाद्ब्राह्मणवचनात्सर्वं परिपूर्णमस्तु·
अस्तु· प्रमादादिति पठेत्· वस्त्रं ब्राह्मणाय दद्यात्·॥ ॥ इति सांकल्पाभ्युदयिकश्रा
द्धं· समाप्तम्·॥ ॥ ॥ ॥ ॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इतिसंकल्पाभ्युदयिकश्राद्धम्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथग्रहशान्तिविधिः ॥८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ग्र·शां· श्रीगणेशायनमः ग्रहपूजाविधिः कर्ताशुचिराचान्तः आसनेउपविश्य· अक्षतिलज
१ लान्यादाय· अद्येहममुकगोत्रोऽमुकशर्माहंममाऽमुककर्मनिर्विघ्नपूर्वकग्रहसूचि
तारिष्टशान्तिकामोदीपकलशगणेशपूजनपूर्वकअधिदेवताप्रत्यधिदेवतासहि
तसूर्यादिनवग्रहाणामावाहनस्थापनपूजनमहंकरिष्ये· इतिसङ्कल्प्य· अर्घ्यसं
स्थाप्य· नमोस्त्वनन्तायेतिदीपंसंपूज्य· कलशंगणेशंचसम्पूज्य· अष्टदलमध्यक
र्णिकायावर्त्तुलेद्वादशाङ्गुलेमण्डलेकिंशदिनंयथारूढंध्वजहलपद्मद्वयंलोहितव
र्णरक्ताम्बरधरंसप्ताश्वरथस्थंसप्तार्चिषंप्राङ्मुखंसूर्यंरक्तपुष्पाक्षतैः आकृष्णेने १

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ति॰ ॐ भूर्भुवःस्वः कलिङ्गदेशोद्भव काश्यपगोत्र सूर्य इहागच्छ इह तिष्ठ॰ आग्नेयद
ले॰ चतुरस्रे चतुर्विंशाङ्गुले मण्डले किरीटिनं द्विभुजं वरगदाहस्तं श्वेतवर्णं श्वेतद
शाश्वरथस्थं सोममादित्याभिमुखं श्वेतपुष्पाक्षतैः इमन्देवा इति ॐ भूर्भुवःस्वः
यमुनातीरोद्भव आत्रेयगोत्र सोम इहागच्छ इह तिष्ठ॰ दक्षिणदले॰ त्रिकोणत्र्यङ्गु
लेमण्डले॰ किरीटिनं रक्तमाल्याम्बरधरं चतुर्भुजं वरशक्तिशूलगदाधरं मेषस्थमा
दित्याभिमुखं कुजं रक्तपुष्पाक्षतैः अग्निर्मूर्द्धा दिवः ककुत्पतिः पृथिव्या अयम्॰
अपां रेतां सि जिन्वति॰ ॐ भूर्भुवःस्वः अवन्तिदेशोद्भव भारद्वाजगोत्र भौम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ग्र·आं· इहागच्छेह तिष्ठ· ईशानदले · बाणाकारे चतुरङ्गुले मण्डले किरीटिनं पीतवस्त्रं पीत
२ माल्यानुलेपनं पीतवर्णं चतुर्भुजं वरखड्गचर्मगदाहस्तं सिंहस्थमादित्याभिमुखं बु
धं पीतपुष्पाक्षतैः उद्बुध्यस्वेति· ॐ भूर्भुवःस्वः मगधदेशोद्भव आत्रेयगोत्र बुध इ
हागच्छेह तिष्ठ· उत्तरदले· दीर्घचतुरस्रे मण्डले षडङ्गुले किरीटिनं पीतवर्णं पी
तमाल्याम्बरधरं चतुर्भुजं वराक्षसूत्रदण्डकमण्डलुधरमादित्याभिमुखं बृहस्पी
तपुष्पाक्षतैः बृहस्पते अतीति· ॐ भूर्भुवःस्वः सिन्धुदेशोद्भव आङ्गिरसगोत्र
बृहस्पते इहागच्छेह तिष्ठ· पूर्वदले· पञ्चकोणे नवाङ्गुले मण्डले किरीटिनं श्वेतव २

माल्याम्बरधरं श्वेतवर्णं चतुर्भुजं वराक्षसूत्रदण्डकमण्डलुधरमादित्याभिमुखं शु
क्रं श्वेतपुष्पाक्षतैः अन्नात्परिस्रुत इति · ॐ भूर्भुवःस्वः भोजकटदेशोद्भवभा
र्गवगोत्र शुक्र इहागच्छ इह तिष्ठ · पश्चिमदले · धनुर्बिम्बकुले मण्डले किरीटिनं
कृष्णवर्णं कृष्णमाल्याम्बरधरं चतुर्भुजं वरत्रिशूलधनुर्बाणधरं गृध्रवाहनमादि
त्याभिमुखं शनिं कृष्णपुष्पाक्षतैः शन्नोदेवीरिति · ॐ भूर्भुवःस्वः सौराष्ट्रदे
शोद्भव काश्यपगोत्र शने इहागच्छ इह तिष्ठ · नैरृत्यदले · सूर्पाकारे वादर
शाङ्कुले मण्डले किरीटिनं कृष्णवर्णं कृष्णमाल्याम्बरधरं करालवदनं चतुर्भु

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जंवरखड्गचर्मधनुर्वरांसिंहस्थमादित्याभिमुखंराहुं कृष्णपुष्पाक्षतैः कया
नइति· ॐ भूर्भुवःस्वः राठिनापूरोद्भवपैठीनसिगोत्राराहोइहागच्छेहतिष्ठ·
वायव्यदले ध्वजाकारेमण्डलेकिरीटिनोधूम्रवर्णान्द्विभुजानादाहलान्विकृ
तमुखान्गृध्रवाहनानादित्याभिमुखान्केतून् धूम्रपुष्पाक्षतैः केतुंकृण्वन्नि
ति· ॐ भूर्भुवःस्वः अन्तर्वेदिसमुद्भवाजैमिनिगोत्राः केतवइहागच्छतेहति
ष्ठ· अथाधिदेवतामावाहयेत्· सूर्यस्यदक्षपार्श्वे· त्र्यम्बकमिति· ॐ भूर्भुवः
स्वः ईश्वरइहागच्छेहतिष्ठ· सोमस्यदक्षपार्श्वे· श्रीश्चते· ॐ भूर्भुवःस्वःउमेइ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हागच्छ इह तिष्ठ· भौमदक्षपार्श्वे· यदक्रन्दः ॐ भूर्भुवःस्वः स्कन्द इहागच्छ
इह तिष्ठ· बुधदक्षपार्श्वे· विष्णोरराटम्· ॐ भूर्भुवःस्वः विष्णो इहागच्छ इह ति
ष्ठ· गुरुदक्षपार्श्वे· आब्रह्मन्· ॐ भूर्भुवःस्वः ब्रह्मन्निहागच्छ इह तिष्ठ· शुक्र
दक्षपार्श्वे· सजोषा इन्द्रः ॐ भूर्भुवःस्वरिन्द्र इहागच्छ इह तिष्ठ· शनिदक्षपार्श्वे
यमाय त्वा· ॐ भूर्भुवःस्वः यम इहागच्छ इह तिष्ठ· राहोर्दक्षपार्श्वे· कार्षिरसि
ॐ काल इहागच्छ इह तिष्ठ· केतु दक्षपार्श्वे· चित्रावसो· ॐ भू
र्भुवःस्वः चित्रगुप्त इहागच्छ इह तिष्ठ· अथ प्रत्यधिदेवान् कुलपञ्च्यास्थानैः आवा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ह्येन॰ सूर्यवामपार्श्वे॰ अग्निर्दूतम्॰ ॐ भूर्भुवःस्वः अग्नेइहागच्छेहतिष्ठ॰ सोम
वामपार्श्वे॰ अप्स्वग्ने॰ ॐ भूर्भुवःस्वःआपइहागच्छतेहतिष्ठत॰ भौमवामपार्श्वे॰
स्योनापृथिवि॰ ॐ भूर्भुवःस्वः पृथिविइहागच्छेहतिष्ठ॰ बुधवामपार्श्वे॰ इदं
विष्णुः ॐ भूर्भुवःस्वःविष्णोइहागच्छेहतिष्ठ॰ गुरुवामपार्श्वे॰ इन्दुऽआसान्॰
ॐ भूर्भुवःस्वःइहागच्छेहतिष्ठ॰ शुक्रवामपार्श्वे॰ अदित्यैरास्नासि॰ ॐ भूर्भुवः
स्वःइन्द्राणिइहागच्छेहतिष्ठ॰ शनिवामपार्श्वे॰ प्रजापतेन॰ ॐ भूर्भुवःस्वःप्रजा
पतेइहागच्छेहतिष्ठ॰ राहुवामपार्श्वे॰ नमोस्तुसर्पेभ्यः ॐ भूर्भुवःस्वःसर्पाइ ४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हागच्छतेहतिष्ठत· केतुवामपार्श्वे· ब्रह्मजज्ञानम्· ॐ भूर्भुवः स्वः ब्रह्मन्निहा
गच्छेहतिष्ठ· एतेरुत्तरे· गणानान्त्वा· ॐ भूर्भुवः स्वः विनायकइहागच्छे
हतिष्ठ· शानेरुत्तरे· अम्बेऽअम्बिके· ॐ भूर्भुवः स्वः दुर्गेइहागच्छेहतिष्ठ·
सूर्योत्तरभागे· वायोयेते· ॐ भूर्भुवः स्वर्वायोइहागच्छेहतिष्ठ· राहोर्दक्षभागे·
ऊर्ध्वोऽअस्म· ॐ भूर्भुवः स्वः आकाशइहागच्छेहतिष्ठ· केतुदक्षिणे· अश्विनो
र्भैषज्येन· ॐ भूर्भुवः स्वः अश्विनौइहागच्छतमिहतिष्ठतं· पूर्वे त्रातारमिंद्रं·
ॐ भूर्भुवः स्वः इन्द्रइहागच्छेहतिष्ठ· आग्नेये· अग्निर्दूतम्· ॐ भूर्भुवः स्वः अग्ने

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ग्र·शां· इहागच्छेहतिष्ठ· दक्षिणे· यमायत्वा· ॐ भूर्भुवःस्वः यमइहागच्छेहतिष्ठ· नैर्ऋ
५ ते· असुन्वन्तम· ॐ भूर्भुवःस्वःनिर्ऋतेइहागच्छेहतिष्ठ· पश्चिमे· तत्वायामि· ॐ
भूर्भुवःस्वःवरुणइहागच्छेहतिष्ठ· वायव्ये· वायोयेते· ॐ भूर्भुवःस्वः वायोइहा
गच्छेहतिष्ठ· उत्तरे· सोमोधेनुं· ॐ भूर्भुवःस्वःसोमइहागच्छेहतिष्ठ· ईशाने
वयं सोम· ॐ भूर्भुवःस्वः ईशानइहागच्छेहतिष्ठ· पूर्वेशानमध्ये· ब्रह्मजज्ञान
म· ॐ भूर्भुवःस्वः ब्रह्मन्निहागच्छेहतिष्ठ· निर्ऋतिवरुणमध्ये· नमोस्तुसर्पेभ्यः
ॐ भूर्भुवःस्वः अनन्तइहागच्छेहतिष्ठ· इन्द्राग्निमध्ये· स्योनापृथिवी· ॐ भूर्भुवःस्वः ५

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ध्रुवाघस्थवसवइहागच्छतेहतिष्ठत: इन्द्रेशानमध्ये· यज्ञोदेवानाम्· ॐ भूर्भुव:
स्व: धाताद्विवादशादित्याइहागच्छतेहतिष्ठत· अग्नियममध्ये· यएतावन्त: ॐ
भूर्भुव:स्व: वीरभद्राघेकादशरुद्राइहागच्छतेहतिष्ठत· यमनिर्ऋतिमध्ये· ॐगो
र्गिर्भिर्मेति· ॐ भूर्भुव:स्व: गौर्यादिषोडशमातरइहागच्छतेहतिष्ठत· निर्ऋतिव
रुणमध्ये· गणानान्त्वा· ॐ भूर्भुव:स्व: गणपतेइहागच्छेहतिष्ठ· वायुसोममध्ये·
मरुतोयस्य· ॐ भूर्भुव:स्व: आवादिमरुद्गणइहागच्छतेहतिष्ठत· वेद्यांयथाव
काशस्थले· आब्रह्मन्· ॐ भूर्भुव:स्व: ब्रह्मन्निहागच्छेहतिष्ठ· इदंविष्णु: ॐ भूर्भुव:

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विघ्नो

ग्र.शां. स्वः इहागच्छेह तिष्ठ· मानस्तोकेत्त· ॐ भूर्भुवः स्वः रुद्र इहागच्छेह तिष्ठ· अग्निश्मि·

६ ॐ भूर्भुवः स्वः अर्क इहागच्छेह तिष्ठ· ॐ वनस्पते वीड्वङ्गः ॐ भूर्भुवः स्वः वनस्पते इ

हागच्छेह तिष्ठ· इति प्रतिमायामक्षतपुञ्जे· मनोजूतिरिति मंत्रेण प्रतिष्ठाप्य· पा

द्यार्घ्याचमनीयस्नानीयपुनराचमनीययज्ञोपवीतवस्त्रगन्धाक्षतपुष्पधूपदीपने

वेद्यताम्बूलफलोपायनद्रव्यादिभिः सम्पूज्य तत्पश्चिमभागे भूमावेव बलिर्देयः

पूर्वोक्तमंत्रैः सूर्याय गुडौदनाभावे घृतदध्यक्षतबलिर्नमः नममेति प्रत्येके त्यागः

सोमाय घृतपायसाभावे· भौमाय मसूरान्नाभावे· बुधाय दुग्धौदनाभावे· बृहस्प ६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गयेदध्योदनाभावे॰ शुक्रायघृतौदनाभावे॰ शनयेकृशरान्नाभावे॰ राहवेछाग॰
मांसाभावे॰ केतुभ्यश्चित्रौदनाभावे॰ ईश्वरायघृतपायसाभावे॰ उमायैघृतपा॰
स्कन्दायघृत॰ विष्णवेघृत॰ ब्रह्मणेघृत॰ इन्द्रायघृत॰ यमायघृत॰ कालायघृ
त॰ चित्रगुप्तायघृत॰ अग्नयेघृत॰ अद्भ्योघृत॰ पृथिव्यैघृत॰ विष्णवेघृत॰ इ
न्द्रायघृ॰ इन्द्राण्यैघृत॰ प्रजापतयेघृत॰ सर्पेभ्योघृत॰ ब्रह्मणेघृत॰ विनाय
कायघृत॰ दुर्गायैघृत॰ वायवेघृत॰ आकाशायघृत॰ अश्विनीभ्यांघृत॰ इ
न्द्रायमाषभक्ताभावे॰ अग्नयेमाष॰ यमायमाष॰ निर्ऋतयेमाष॰ वरुणायमा॰

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ग्र०शां वायवेमाष० सोमायमाष० ईशानायमाष० ब्रह्मणेमाष० अनन्तायमाष० ध्रुवाद्य
७ ष्टवसुभ्योमाष० धात्रादिद्वादशादित्येभ्योमाष० वीरभद्राद्येकादशरुद्रेभ्योमाष०
गौर्यादिषोडशमातृभ्योमाष० आवहादिसप्तमरुद्भ्योमाष० विनायकायमाष० ब्र
ह्मणेमाष० विल्मवेमाष० रुद्रायमाष० अर्कायमाष० वनस्पतये
माष० इतिबलिंदत्वा० वेद्युपरिहलमार्गंफलपुष्पशोभितंवितानंदद्यात्० एवंपू
जांनिवर्त्य० जलमादाय० अद्येहाऽमुकगोत्रोऽमुकशर्माहंममग्रहशान्तिकर्मणिआद्य
राज्यभागदेवतेन्द्राग्निदेवताभ्यःप्रधानभूतेभ्योऽधिदेवतासहितनवग्रहेभ्योविनाय ७

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कादिपञ्चलोकपालेभ्य इन्द्रादिदिक्पालेभ्यो ध्रुवाद्यष्टवसु धात्रादिद्वादशादित्य वी
रभद्राद्येकादशरुद्र गौर्यादिषोडशमातृभ्यो आवहादिसप्तमरुद्भ्यो विनायकब्रह्म
विष्णुरुद्रार्कवनस्पतिस्विष्टकृद्देवेभ्य इदमाज्यादिहवनीयद्रव्यं मयात्यक्तं न
न्तसन्नमम· इति त्यागं कुर्यात्· प्रत्येकमष्टोत्तरशतमष्टाविंशतिर्वा दशाष्टौ वा द्रव्य
योजुहुयात्· ॐ प्रजापतयेस्वाहा· इदं प्रजापतये· ॐ इन्द्रायस्वाहा· इदमिन्द्राय· इ
त्याघारौ· ॐ अग्नयेस्वाहा· इदमग्नये· सोमायस्वाहा· इदं सोमाय· इत्याज्यभागौ·
आकृष्णेनेति हिरण्यपक्षपूपगन्ध विहितिष्टुष्छन्दः सविता देवता ऽदित्यप्रीतये कपिलाग्नौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ग्र·शां· आज्यार्कसमिद्धोमेविनियोगः आकृष्णेनस्वाहा· इदंसूर्याय·इमन्देवेतिवरुणऋ
८ षिरत्यष्टिछन्दःसोमोदेवतासोमप्रीतयेपिङ्गलाग्नौ आज्यपालाशसमिद्धोमेविनि
योगः इमन्देवाःस्वाहा·इदंसोमाय· अग्निमूर्द्धेति विरूपाक्षऋषिर्गायत्रीछन्दोंऽगार
कोदेवताकुजप्रीतयेधूमकेतवग्नौ आज्यखादिरसमिद्धोमेविनियोगः ॐ अग्नि
मूर्धा॰स्वाहा· इदंकुजाय· उद्बुध्यस्वेतिपरमेष्ठि ऋषिस्त्रिष्टुप्छन्दोबुधोदेवता
बुधप्रीतयेजाठराग्नौआज्यापामार्गसमिद्धोमेविनियोगः ॐ उद्बुध्यस्व॰स्वाहा·
इदंबुधाय· बृहस्पतेइतिगृत्समदऋषिस्त्रिष्टुप्छन्दोबृहस्पतिर्देवतागुरुप्रीतये ८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शिरव्यग्नौ आज्यपिप्पलसमिद्धोमेविनियोगः बृहस्पते अति॰स्वाहा॰इदं बृहस्प
तये॰ अन्नात्परिस्रुतइति प्रजापत्यश्विसरस्वतीन्द्राऋषयोजगतीछन्दः शुक्रोदे
वताशुक्रप्रीतयेहाटकाग्नौ आज्योदुम्बरसमिद्धोमेविनियोगः ॐ अन्नात्परिस्रु
तः॰स्वाहा॰ इदंशुक्राय॰ शन्नोदेवीरितिदध्यङ्ङाथर्वणऋषिर्गायत्रीछन्दः शनि
र्देवताशनिप्रीतयेमहातेजाग्नौ आज्यशमीसमिद्धोमेविनियोगः ॐ शन्नोदे
वीः॰स्वाहा॰ इदंशनये॰ कयानइतिवामदेवऋषिर्गायत्रीछन्दोराहुर्देवताराहु
प्रीतयेहुताशनाग्नौ आज्यदूर्वासमिद्धोमेविनियोगः ॐ कयानः स्वाहा॰इदंराहु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ग्र·शां· वे· केतुंकृण्वन्नितिमधुच्छन्दऋषिर्गायत्रीछन्दः केतवोदेवता केतुप्रीतयेहुताश
९ नाग्नौ आज्यकृशरमिश्रहोमेविनियोगः ॐ केतुंकृण्वन्० स्वाहा· इदंकेतुभ्यः ॐ
त्र्यम्बकं० स्वाहा· इदमीश्वराय· अग्रप्रणीतोदकस्पर्शः ॐ श्रीश्चते० स्वाहा· इदमु
मायै· ॐ यदक्रन्दः० स्वाहा· इदंस्कन्दाय· ॐ विष्णोरराटम्० स्वाहा· इदंविष्णवे·
ॐ आब्रह्मन्० स्वाहा· इदंब्रह्मणे· ॐ सजोषाइन्द्रम्० स्वाहा· इदमिन्द्राय· ॐ यमा
यत्वा० स्वाहा· इदंयमाय· अग्रप्रणीतोदकस्पर्शः ॐ कार्षिरसि० स्वाहा· इदंकाला
य· अग्रप्रणीतोदकस्पर्शः ॐ चित्रावसो० स्वाहा· इदंचित्रगुप्ताय· अग्रप्रणीतोद ९

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कस्पर्शः ॐ अग्निन्दूतम्० स्वाहा· इदमग्नये· ॐ अप्स्वग्नेः० स्वाहा· इदमद्भ्यः ॐ स्यो
नापृथिवि० स्वाहा· इदं पृथिव्यै· ॐ इदं विष्णुः० स्वाहा· इदं विष्णवे· ॐ त्रातारमि
न्द्रं० स्वाहा· इदमिन्द्राय· ॐ अदित्यैरास्ना० स्वाहा· इदं शच्यै· ॐ प्रजापतेन० स्वा
हा· इदं प्रजापतये· ॐ नमोस्तु सर्पेभ्यः० स्वाहा· इदं सर्पेभ्यः ॐ ब्रह्मजज्ञानम्० स्वा
हा· इदं ब्रह्मणे· ॐ गणानान्त्वा० स्वाहा· इदं गणपतये· ॐ अम्बे अम्बिके० स्वाहा·
इदं दुर्गायै· ॐ वायोयेत्ते० स्वाहा· इदं वायवे· ॐ ऊर्ध्वा अस्य० स्वाहा· इदमाकाशा
य· ॐ अश्विनोः० स्वाहा· इदमश्विभ्याम्· ॐ त्रातारमिन्द्रं० स्वाहा· इदमिन्द्राय· ॐ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

प्र·हो· अग्निन्दूतं० स्वाहा· इदमग्नये· ॐ [redacted] ॐ यमायत्वा० स्वाहा·
१० इदंयमाय· अत्रप्रणीतोदकस्पर्शः ॐ असुन्वन्तं० स्वाहा· इदंनिर्ऋतये· अत्रप्रणी
तोदकस्पर्शः ॐ इमम्मे० स्वाहा· इदंवरुणाय· ॐ वायोयेते० स्वाहा· इदंवायवे·
ॐ वयर्ठ·सोम० स्वाहा· इदंसोमाय· ॐ तमीशानं० स्वाहा० इदमीशानाय· अत्र
प्रणीतोदकस्पर्शः ॐ ब्रह्मजज्ञानं० स्वाहा· इदंब्रह्मणे· ॐ नमोस्तुसर्पेभ्यः० स्वाहा·
इदंसर्पेभ्यः ॐ स्रुगावोदेवाः स्वाहा· इदंध्रुवाद्यष्टवसुभ्यः ॐ यज्ञोदेवानाम्० स्वाहा·
इदंधात्रादिद्वादशादित्येभ्यः ॐ यएतावन्तः० स्वाहा· इदंवीरभद्राद्येकादशरु १०

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

 द्रेभ्यः अत्रप्राणितोदकस्पर्शः ॐ गौरीर्मिमा॰ स्वाहा॰ इदं गौर्यादिषोडशमातृभ्यः
 ॐ महन्तोयस्य॰ स्वाहा॰ इदमावहादिसप्तमरुद्भ्यः ॐ गणानान्त्वा॰ स्वाहा॰ इदं
विनायकाय॰ ॐ आब्रह्मन्॰ स्वाहा॰ इदं ब्रह्मणे॰ ॐ इदं विष्णुः॰ स्वाहा॰ इदं विष्ण
वे॰ ॐ मानस्तोके॰ स्वाहा॰ इदं रुद्राय॰ अत्रप्राणितोदकस्पर्शः ॐ चित्रन्देवानां॰
स्वाहा॰ इदमर्काय॰ ॐ वनस्पते॰ स्वाहा॰ इदं वनस्पतये॰ ॐ अग्नयेस्विष्टकृते॰
स्वाहा॰ इदं अग्नयेस्विष्टकृते॰ ततः संस्रवं प्राश्य॰ आचामेत्॰ ततोऽग्निस्थापना
क्रमहवनं कुर्यात्॰ ततः क्षमाप्य॰ ब्रह्मामुराणिहिरण्यएणाध्वकारिर्भानुःशशीभूमि

अत्रावसरे॰ क्रमेणदानानि॰। कपिला १ शंखः २ वृषः ३ सुवर्णं॰ ४
पीतवस्त्रम्॰ ५ श्वेताश्वं॰ ६ कृष्णागौः॰ ७ लोहः ८ छागः॰ ९ = २

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सुतोबुधश्च· गुरुश्चशुक्रः शनिराहुकेतवोनवग्रहाः शान्तिकराभवन्तु· ॥ ॥
विसर्जयेत्· ॥ ॥ इतिग्रहपूजाविधिः ॥ ॥ समाप्ता· ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथमण्डपचाल्पूजाविधिः १०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मं॰वा॰ श्रीगणेशायनमः अथमण्डपवास्तुपूजाविधिः कुशादीन्यादाय॰ अद्येहम
१ मअमुककर्मणिमण्डपवास्तुपूजनमहंकरिष्ये॰ इतिसंकल्प्य॰ मंडपनैर्ऋ
त्यभागेईशानादिकोणचतुष्के॰ विशन्तुभूतलेनागालोकपालाश्चसर्वतः
तिष्ठन्तुमंडलेचास्मिन्नायुर्बलकराःसदा॰ इतिमंत्रेणशङ्कून्रोपयित्वा॰ तत्र
आग्नेयादिशङ्कुपार्श्वेमाषभक्तबलीन्दद्यात्॰ अग्निभ्योप्यथसर्पेभ्योयेचान्ये
तत्समाश्रिताः तेभ्योबलिंप्रयच्छामिपुण्यमोदनमुत्तमम्॰ इत्याग्नेये॰ नैर्ऋ
त्याधिपतिश्चैवनैर्ऋत्यांयेचराक्षसाः बलिंतेभ्यःप्रयच्छामिसर्वेगृह्णन्तुमंत्रि १।

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नम्· इतिनैर्ऋत्ये· ॐनमोवायुरक्षोभ्योयेचान्येनत्समाश्रिताः वलिंतेभ्यः
प्रयच्छामिपुराणमोदनमुत्तमम्· इतिवायव्ये· ॐरुद्रेभ्यश्चैवसर्पेभ्योयेचान्ये
तत्समाश्रिताः वलिंतेभ्यः प्रयच्छामिगृह्णन्तुसततोत्सुकाः इतीशानेव
लिंदद्यात्· ततोयजमानेकरस्थविस्तारण्यामाच्छवास्तुमंडलोपरिवस्त्रंप्र
सार्य· सुवर्णशलाकयागन्धेनपश्चादारभ्यप्रागन्ताउदक्संस्थारेखाः कुर्या
देभिर्मंत्रैः ॐशान्तायैनमः ॐयशोवत्यैनमः ॐकान्तायैनमः ॐविशा
लायैनमः ॐप्राणवाहिन्यैनमः ॐसत्यैनमः ॐसुमनायैनमः ॐनन्दा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मं०वा० यैनमः ॐ सुभद्रायैनमः ८ दक्षिणारंभाउदगंताः प्राक्संस्थारेखाः कुर्याद्देभि
२ र्मंत्रैः ॐ हिरण्यायैनमः १ ॐ सुव्रतायैनमः २ ॐ लक्ष्म्यैनमः ३ ॐ विभूत्यैनमः
४ ॐ विमलायैनमः ५ ॐ प्रियायैनमः ६ ॐ जयायैनमः ७ ॐ कालायैनमः ८
ॐ विशोकायैनमः ९ इति नवरेखांकृत्वा॰ ईशानादारभ्य अर्धकोष्ठादारभ्य
शिख्यादीन्पूजयेत्॰ अक्षतपुञ्जेषु प्रतिमायांवा॰ ॐ अग्निमूर्धादिवःककु
त्पतिःपृथिव्याअयम्॰ अपाᳪरेताᳪसिजिन्वति॰ शिखिनमावाहयामिपू
जयामिनमः॰ एवंसर्वत्र॰ ॐ महाँ२॥इन्द्रोयऽओजसापर्जन्योवृष्टिमाँ२॥इ २

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

व॰ स्तोमैर्वत्सस्य वावृधे॰ उपयामगृहीतोसि महेन्द्राय त्वैष ते योनिर्महेन्द्राय
त्वा॰ पर्जन्यो मा॰ २ ॐ उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमं श्रथाय॰ अ
था वयमादित्य व्रते तवानागसो अदितये स्याम॰ जयन्त मा॰ ३ इन्द्रऽआसां ने
ता बृहस्पतिर्दक्षिणा यज्ञः पुर एतु सोमः॰ देवसेनानामभिभञ्जतीनां जयन्ती॰
नां मरुतो यन्त्वग्रम्॰ कुलिशायुध मा॰ ४ सूर्यरश्मिर्हरिकेशः पुरस्तात्सविता॰
ज्योतिरुदयाँ॥ अजस्रम्॰ तस्य पूषा प्रसवे याति विद्वान्त्संपश्यन्विश्वा भुवना
नि गोपाः॰ सूर्य मा ५ सत्यं च मे श्रद्धा च मे जगच्च मे धनं च मे विश्वं च मे महश्च मे क्री

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मं·वा· ऽच मे मोऽश्च मे जातं च मे जनिष्यमाणं च मे सूक्तं च मे सुकृतं च मे यज्ञेन कल्पं
३ ताम्· ॐ [illegible]मा·६ ॐ भायै दार्वाहारं प्रभाया अग्न्येधं ब्रध्नस्य विष्टपायाभि
षेक्तारं वर्षिष्ठाय नाकाय परिवेष्टारं देवलोकाय पेशितारं मनुष्यलोकाय प्र
करितारं सर्वेभ्यो लोकेभ्य उपसेक्तारमव ऋत्यै वधायोपमन्थितारं मेधाय
वासः पल्पूलीं प्रकामाय रजयित्रीम्· [illegible]शामा·७ ॐ ऊर्ध्वा ऽअस्य समिधो भव
न्त्यूर्ध्वा शुक्रा शोचींष्यग्नेः द्युमत्तमा सुप्रतीकस्य सूनोः आ[illegible]शामा·८ ॐ
वातो वा मनो वा गन्धर्वाः सप्तविंशतिः ते अग्रेऽश्वमयुञ्जंस्ते अस्मिञ्जवमादधुः· ३
९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गायत्रमा॰ ९ ॐ पूषापंचाक्षरेणपञ्चदिशउदजयत्ताउज्जेषं सविताषडक्षरे
णषडृतूनुदजयत्तानुज्जेषंमरुतःसप्ताक्षरेणसप्तग्राम्यान्पशूनुदजयंस्ता
नुज्जेषंबृहस्पतिरष्टाक्षरेणगायत्रीमुदजयत्तामुज्जेषम्॰ पूषाशामा॰ १० ॐ
सविताप्रथमेहन्नग्निर्द्वितीयेवायुस्तृतीयआदित्यश्चतुर्थेचन्द्रमाःपंचमऋ
तुःषष्ठेमरुतःसप्तमेबृहस्पतिरष्टमेमित्रोनवमेवरुणोदशमऽइन्द्रऽएकाद
शेविश्वेदेवाद्वादशे॰ विततमा॰ ११ ॐ गृहामाबिभीतमावेपध्वमूर्ज्जंबिभ्रतएम
सि॰ ऊर्ज्जंबिभ्रद्वःसुमनाःसुमेधागृहानैमिमनसामोदमानः॰ गृहक्षत्रमा॰ १२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मं·व्या· ॐयमायत्वामखायत्वासूर्यस्यत्वातपसे· देवस्त्वासविनामध्वानक्तुपृथिव्याःसꣳ
४· स्पृशस्पाहि· अर्चिरसिशोचिरसितपोसि· यममा·१३ ॐगन्धर्वस्त्वाविश्वावसुः
परिदधातुविश्वस्यारिष्ट्यैयजमानस्यपरिधिरस्यग्निरिडऽईडितः· इन्द्रस्यबाहुरसि
दक्षिणोविश्वस्यारिष्ट्यैयजमानस्यपरिधिरस्यग्निरिडऽईडितः· मित्रावरुणौत्वो
त्तरतःपरिधत्तांध्रुवेणधर्मणाविश्वस्यारिष्ट्यैयजमानस्यपरिधिरस्यग्निरिडऽई
डितः· गन्धर्वमा०१४ ॐयमायत्वा० मृꣳराजमा०१५ ॐचन्द्रमाऽअप्स्वन्तरासुप
र्णोधावतेदिवि· रयिंपिशङ्गंबहुलंपुरुस्पृहꣳहरिरेतिकनिक्रदत्· मृगामा०१६ ४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ पितृभ्यः स्वधायिभ्यः स्वधानमः पितामहेभ्यः स्वधायिभ्यः स्वधानमः प्रपिता
महेभ्यः स्वधायिभ्यः स्वधानमः ॰ अक्षन्पितरोमीमदन्तपितरोतीतृपन्तपितरः
पितरः शुन्धध्वम्॰ पितृनोवा॰ १) ॐ आब्रह्मन्ब्राह्मणोब्रह्मवर्चसीजायतामा
राष्ट्रेराजन्यः शूरऽइषव्योतिव्याधीमाहारथोजायतान्दोग्ध्रीधेनुर्वोढानड्वाना
शुः सप्तिः पुरन्धिर्योषाजिष्णूरथेष्ठाः सभेयोयुवास्ययजमानस्यवीरोजायतां
निकामेनिकामेनः पर्जन्योवर्षतुफलवत्योनऽओषधयः पच्यन्तांयोगक्षेमो
नः कल्पताम्॰ दौवारिकमा॰ १८ ॐ तस्मात्ससमसवसः प्रसवेतन्वोयज्ञम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मं.का. श्रीयस्वाहा · शुक्रमसिचन्द्रमस्यमृतमसिवैश्वदेवमसि · सुग्रीवमा०१९ ओंन
५ क्षत्रेभ्यःस्वाहानक्षत्रियेभ्यःस्वाहाहोरात्रेभ्यःस्वाहार्धमासेभ्यःस्वाहामासेभ्यः
स्वाहाऋतुभ्यःस्वाहार्त्तवेभ्यःस्वाहासंवत्सरायस्वाहाद्यावापृथिव्यांस्वाहाचन्द्रा
यस्वाहासूर्यायस्वाहारश्मिभ्यःस्वाहावसुभ्यःस्वाहारुद्रेभ्यःस्वाहादित्येभ्यःस्वा
हामरुद्भ्यःस्वाहाविश्वेभ्योदेवेभ्यःस्वाहामूलेभ्यःस्वाहाशाखाभ्यःस्वाहावनस्प
तिभ्यःस्वाहापुष्पेभ्यःस्वाहाफलेभ्यःस्वाहौषधीभ्यःस्वाहा · प्रयद्दत्तामा० २०
ॐवरुणस्योत्तंभनमसिवरुणस्यस्कंभसर्जनीस्थोवरुणस्यऋतसदस्यसि ५

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वरुणस्यऋतसदनमसिवरुणस्यऋतसदनमासीद॰ वरुणमा॰२१ ॐ ये
रूपाणिप्रतिमुञ्चमानाअसुराःसन्तःस्वधयाचरन्ति॰ परापुरोनिपुरोयेभरन्
त्यग्निष्टाँल्लोकात्प्रणुदात्यस्मात्॰ असुरमा॰२२ ॐ असवेस्वाहावसवेस्वाहा
विभुवेस्वाहाविवस्वतेस्वाहागणश्रियेस्वाहागणपतयेस्वाहाभिभुवेस्वाहाधि
पतपयेस्वाहाशूषायस्वाहासꣳसर्पायस्वाहाचन्द्रायस्वाहाज्योतिषेस्वाहाम
लिम्लुचायस्वाहादिवापतयेस्वाहा॰ शेषमा॰२३ ॐ अग्नेयुक्ष्वाहियेतवाश्वासो
देवसाधवः अरंवहन्तिमन्यवे॰ पापमा॰२४ ॐ शिरोमेश्रीर्यशोमुखंत्विषिःके

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मं·वा· शाश्वश्मश्रूणि · राजामेप्राणोऽअमृतꣳ सम्राट्चक्षुर्विराट्श्रोत्रम् · रोगमा०
६ २५ ॐ नमोस्तुसर्पेभ्योयेकेचपृथिवीमनु · येअन्तरिक्षेयेदिवितेभ्यःसर्पेभ्योन
मः · सर्पमा० २६ ॐ इषेत्वोर्जेत्वावायवस्थदेवोवःसवितापार्पयतुश्रेष्ठतमाय
कर्मण आप्यायध्वमघ्न्याऽइन्द्रायभागम्प्रजावतीरनमीवाऽअयक्ष्मामावस्ते
नऽईशतमाघशꣳसोध्रुवाऽअस्मिन्गोपतौस्यातबह्वीर्यजमानस्यपशून्पा
हि · मुख्यमा० २७ ॐ घृताच्यसिजुहूर्नाम्नासेदंप्रियेणधाम्नाप्रियꣳसदऽआ
सीदघृताच्यस्युपभृन्नाम्नासेदंप्रियेणधाम्नाप्रियꣳसदऽआसीदघृताच्य ६

सिध्रुवा नाम्नासेदंप्रियेण धाम्नाप्रियꣳसदꣳ आसीदप्रियेण धाम्नाप्रियꣳसद ऽ
आसीदꣳध्रुवा ऽ असदन्नृतस्पयोनौत्ताविष्णोपाहिपाहियज्ञंपाहियज्ञपतिंपाहि
मांयज्ञन्यम्· मह्नात मा० २८ ॐ वयꣳ सोमव्रतेतवमनस्तनूषुविभ्रतः· प्रजावन्
तःसचेमहि· सोममा० २९ ॐ उदुत्यञ्जातवेदसन्देवंवहन्तिकेतवः· दृशेविश्वा
यसूर्यम्· सूर्यमा० ३० ॐ अदितिर्द्यौरदितिरन्तारिक्षमदितिर्मातासपितासपुत्रः
विश्वेदेवा ऽ अदितिः पञ्चजना ऽ अदितिर्जातमदितिर्जनित्वम्· अदितिमा० ३१
ॐ यदिदिवायदिनक्तमेनाꣳसिचकृमावयं· वायुर्मातस्मादेनसोविश्वान्मु

ति २

मं·का· स्वस्त्वर्ठं हसः· दितिमा०३२ ॐ वहरागस्पोतंभ०आपमा०३३ ॐ वसोःपवित्रमः
७ सिशतधारंवसोःपवित्रमसिसहस्रधारं · देवस्त्वासविता पुनातुवसोःपवि
त्रेणशतधारेणसुप्वाकामधुक्षः · साविश्वमा०३४ ॐ यदक्रन्दःप्रथमंजायमा
नउद्यन्त्समुद्रादुतवापुरीषात् · श्येनस्यपक्षाहरिणस्यवाहूउपस्तुत्यंमहिजा
तन्तेऽअर्वन् · जगमा·३५ ॐ यातेरुद्रशिवातनूरघोरापापकाशिनी · तयानस्त
न्वाशन्तमयागिरिशन्ताभिचाकशीहि · रुद्रमा०३६ ॐ अर्यमणंबृहस्पति
मिन्द्रंदानायचोदय · वाचंविष्णुर्ठंसरस्वतीॐसवितारञ्चवाजिनर्ठंस्वाहा · ७

अर्यमणामा॰ ३७ ॐ उदुत्यंजातवेदसंदेवंवहन्तिकेतवः। दृशेविश्वायसूर्यम्॰ ॥ सवितारमा॰
३८ ॐ असियमोअस्यादित्योऽअर्वन्नसित्रितोगुह्येनव्रतेन। असिसोमेन
समयाविपृक्तऽआहुस्तेत्रीणिदिविबन्धनानि। विवस्वन्तमा॰ ३९ ॐ त्राता
रमिन्द्रꣳहवेहवेसुहवꣳशूरमिन्द्रम्। ह्वयामिशक्रंपुरुहूतमिन्द्रꣳस्वस्ति
नोमघवाधात्विन्द्रः। विद्वावीपमा॰ ४० ॐ मित्रस्यमाचक्षुषासर्वाणिभूता
निसमीक्षन्ताम्। मित्रस्याहंचक्षुषासर्वाणिभूतानिसमीक्षे। मित्रस्यचक्षुषा
समीक्षामहे। मित्रमा॰ ४१ ॐ इमन्देवाऽअसपत्नꣳसुवध्वंमहतेक्षत्रायम

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मं·बा· हते ज्यैष्ठ्यायमहते जानराज्यायेन्द्रस्येन्द्रियाय · इमममुष्यपुत्रममुष्यैपुत्रम
८ स्यैविशएषवोमीराजासोमोस्माकंब्राह्मणानांराजा · राजयक्ष्माणामा०
४२ ॐ यज्ञामेयदरापेयन्त्स्मायांयदिन्द्रिये · यदेनश्चकृमावयमिदंतदवय
जामहेस्वाहा · पृथ्वीसरमा० ४३ ॐ ऋचंवाचंप्रपद्येमनोयजुःप्रपद्येसामप्राणं
प्रपद्येचक्षुःश्रोत्रंप्रपद्ये · वागोजःसहौजोमयिप्राणापानौ · आपवत्सरमा० ४४
ॐ ब्रह्मजज्ञानंप्रथमंपुरस्ताद्विसीमतःसुरुचोवेनऽआवः · सबुध्न्याऽउपमाऽ
अस्यविष्ठाःसतश्चयोनिमसतश्चविवः · ब्रह्मागामा० ४५ ॐ वामलोध्यनेप्र ८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्तिजानीत्यस्मात्स्यावेशोऽअनमीवोभवानः· यत्त्वेमहेप्रतितन्नोजुषस्वशन्नो
भवद्विपदेचतुष्पदे· वास्तोस्पतिमावाहयामिपूजयामिनमः ४६ ईशाने· ॐ च
रक्यैनमः· आग्नेये· ॐ विदार्य्यैनमः· नैरृत्ये· ॐ पूतनायैनमः· वायव्ये· ॐ पाप
राक्षस्यैनमः· पूर्वे· ॐ स्कन्दायनमः दक्षिणे· ॐ अर्यम्णेनमः· पश्चिमे· ॐ जृम्भ
कायनमः उत्तरे· ॐ पिलिपिच्छायनमः पूर्वे· ॐ इन्द्रायनमः आग्नेये· ॐ अग्नये
नमः दक्षिणे· ॐ यमायनमः नैरृत्ये· ॐ निर्‌ऋतयेनमः पश्चिमे· ॐ वरुणायन
मः वायव्ये· ॐ वायवेनमः उत्तरे· ॐ सोमायनमः ईशाने· ॐ ईशानायनमः इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मं॰ बा॰ शिख्यादिदेवताः संपूज्य॰ बलिंदद्यात्॰ ॐ शिखिने एष पायसबलिर्नमः एवंप
९ र्जन्यादिभ्योपि॰ ततोनैर्ऋत्येकलशंस्थापयेत्॰ ॐ शिखिनेस्वाहा॰ एवंपर्जन्या
दिभ्योहुत्वा॰ पावमानराक्षोघ्नसूक्ताभ्यांत्रिसूत्र्यामंडपम्वेष्टयेत्॰ स्वादिष्ठया
मदिष्ठयापवस्वसोमधारया॰ इन्द्रायपातवेसुतः १ रक्षोहाविश्वचर्षणिरभियो
निमयोहतम्॰ द्रुणासधस्थमासदत्॰ २ वरिवोधातमोभवमंहिष्ठोवृत्रहन्तमः
पर्षिराधोमघोनाम्॰ ३ अभ्यर्षमहानांदेवानांवीतिमन्धसा॰ अभिवाजमुतश्र
वः ४ त्वामच्छाचरामसितादिदर्थंदिवेदिवे॰ इन्दोत्वेनआशसः ५ पुनातितेपरि ९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्रुतंसोमंसूर्यस्यदुहिता· वारेणशश्वतातना· ६ तमीमण्वीःसमर्यआगृभ्णन्
तियोषणोदश· स्वसारःपार्येदिवि· ७ तमींहिन्वन्त्यग्रुवोधमन्तिबाकुरंदृतिम्
त्रिधातुवारणंमधु· ८ अभिममघ्न्याउतश्रीणन्तिधेनवः सोममिन्द्रायपातवे· ९
अस्येदिन्द्रोमदेष्वाविश्वावृत्राणिजिघ्नते· शूरोमघाचमंहते· इतिपावमानसूक्तं·
कृणुष्वपाजःप्रसितिंनपृथ्वींयाहिराजेवामवाँ इभेन· तृष्वीमनुप्रसितिंद्रू
णानोस्तासिविध्यरक्षसस्तपिष्ठैः १ तवभ्रमासआशुयापतन्त्यनुस्पृशधृषता
शोशुचानः तपूंष्यग्नेजुह्वापतङ्गानसन्दितोविसृजविष्वगुल्काः २ प्रतिस्पशोवि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मं·षा· स्रजनूर्गिनमोभवापायुर्विशोअस्माअदब्धः योनोदूरे अघशंसोयोअन्त्यग्नेमाकि
१० ष्टेव्यथिरादधर्षीत् ३ उदग्नेतिष्ठप्रत्यातनुष्वन्यमित्रान्ओषतातिग्महेते· योः
नोअरातिंसमिधानचक्रेनीचातंधक्ष्यतसन्नशुष्कम्· ४ ऊर्ध्वोभवप्रतिविध्याध्य
स्मदाविष्कृणुष्वदैव्यान्यग्ने· अवास्थिरातनुहिजातुजूनांजामिमजामिंप्रमृणीहि
शत्रून्· ५ ॥ इतिराक्षोघ्नसूक्तम्॥ ॥इतिनरकपञ्चाङ्गविधिः समाप्ता·॥शुभं

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथमराडपरचनापूजाविधिः॥ ११

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मं·पू· श्रीगणेशायनमः अथमण्डपरचनापूजाविधिः इष्टेसमभूगतेजुगतेजुकेन्द्रस्थि
१ तशंकोः क्रमशोविशत्यपैति· छायायमिहापराचपूर्वाताभ्यांसिद्ध्यतिमेरुदक्च
याम्या· प्रथमंभूमिंखननताडनोपलेपनादिभिःसमांविधाय· वितस्तिविस्तृते
नकर्कटकेनवृत्तंसंरच्य· तस्यबिन्दावष्टांगुलमितंऋजुंशंकुंसूर्योदयाद्घटि
कानन्तरंऋजुंस्थापयेत्· तच्छायावृत्ताद्बहिःपश्चिमेयाति· यदाप्रहरोत्तरंछा
याग्रवृत्तसमीपेयातियत्रतदास्यविशतितत्रबिन्दुंदेयं· सापश्चिमा· पुनर्मध्या
ह्नोत्तरंवत्रवृत्तात्तदाबहिर्यातितत्रबिन्दुंदेयम्· सापूर्वा· तयोःसूत्रेदत्तेपूर्वाप १

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रंसिद्धम्· तदेवकर्कटकंषडंगुलंवर्धयित्वा· तस्याचलंपादंपूर्वचिन्हेनिधा
य· पश्चिमतोहस्तमध्येहस्तार्धंपश्चिमेचिन्हेनिधाय· पूर्वतोहस्तार्धंदेयम्·
तद्घटाकारंमत्स्यंभवति· तस्मिन्नुभयमत्स्यमुखेसूत्रेदत्तेदक्षिणोत्तरेभव
तइति· अथचतुरस्त्रीकरणम्· द्विघ्नायामेति· विस्ताराद्विगुणंउभयतःपाशयुक्तं
हठरज्जुंकृत्वा· आयामत्रिपादेविस्तारार्धेचचिन्हद्वयंरज्जौएकमुखतोदेयं·
आयामत्रिपादस्यकर्षसंज्ञा· विस्तारार्धस्यकोणइति· क्षेत्रेयावदायामःक
ल्पितस्तस्योभयतःक्षेत्रान्तेकीलद्वयंनिधायरज्जुपाशौधार्यौ· ततःकर्णारव्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मं॰त॰ चिन्हंगृहीत्वोभयतोयथासमःस्यात्तथाकर्षयेत्· कोणाख्यचिन्हेकोणकीलं
२ निखनेत्· पुनरन्यदिशिनिखनेत्· पुनःकोणकीलंनिखनेत्· एतेनकोणाद्व
यंसिद्धं· प्रथमकीलयोरज्जुपाशविनिमयेनपूर्ववदुभयतःकर्षणापुनःकोणा
द्वयंजातंसिद्धंचतुरस्रं· संपूज्यादौगणेशंतदनुचवसुधाननन्तकूर्मांश्चदत्वाक्षी
पेनाख्यंबलिंकोदधिदूर्वारजनीसल्लाजैःपयोभिः विप्रानभ्यर्च्यदेवज्ञमपिनि कु ३
जगृहंशिल्पिनंतोषयित्वापुराणाइंवाचयित्वागदितशुभदिनेमंडपंप्रारभेत्
१ दशास्तूर्य १०।१२ करोन्मितोऽधमस्मादिनशाक १४।१६ प्रमितैःकरैरुमर २

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ध्मः। धृतिभूपकरान्मितो १६। १८ वरीयान्नरव २० हस्तोप्पथमंडपस्तुलायाम्। २
दिगन्तरालेद्वि २ करंभवेद्ध्वश्चनृष्टयंवेद ४ गजा ८ कुलैस्तन्। विवर्द्धितंमध्यव
रिष्ठयोःस्याद्वेदीत्रिभागेनसमाकरोच्चा। ३ समात्रित्रिभागेचसूत्रंप्रदद्यादुदग्दक्षि
णंचापिपूर्वापरंच। ततस्त्र्यंशपूर्णौचकोणेषुदद्यात्समस्तंभकान्द्वादशैवेषुह
स्तान्। ४ वेद्याःकोणेहस्ति ८ हस्तोच्चवेद ४ स्तम्भान्दद्याद्वह्निदिक्कःसचूडान्।
प्रादक्षिण्यात्पञ्चमांशान्तुभूमौदद्यादेवंषोडश १६ स्तम्भसंख्या। ॥ ५ ॥ स्तंभेषु
तिर्यक्वलिकाविधेयाश्चूडासुकर्णोप्यथयावहिस्ताः। पूर्वापरंदक्षिणसौम्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मं॰भू॰ दिक्स्थकोणेनराकाष्ठचयंनिदध्यात्॥६ मध्यमागशिखरंरचयित्वाद्धदयेद
३ पिकैर्टैकजवंशैः।द्वारवर्जमिहमंडपमेनंलंभकानपिसुवह्निसम्हैः।७ पूर्वा
द्दिक्षुरचयेदपितोरणानिन्यग्रोधजन्तुफलपिप्पलप्लक्षराजैः।अश्वत्थजन्तुफ
लपर्णटिम्भरिपद्मिलेयामभावतःइमान्यथवैककेन।८ हस्ताद्वहिर्मरडनःशरा
ऽस्वरैः५।६।७करैस्तान्यमादिकेषु।दीर्घाशिाचषडकुरथायतिःस्यात्तेषांद्विहस्ता
चरणाप्रयुक्ता।९ लंभार्द्धमानंफलकन्तुतिर्यक्नवेशाविश्व९।११।१३प्रमिताङ्गु
लाश्च।तन्मूर्द्धिकीलाःस्वतुरीयभागमिताश्वशूलाक्रुनयश्चतेसुः।१० तदेशनाद्वि ३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

त्रियुगा२।३।४कुलानिशैवेतुविष्णोर्यजनेकुलर्द्धिः३।४।५कीलेषुशंखारिगदां
भुजांकषिंपंश५रोपःकिलतोरगेषु।११।उद्यन्पत्रफलानिनम्रविलसद्भार
भिरालिङ्गितस्तंभोनेकदलैरसालविटपैःसर्वत्रसंवेष्टितः।राजच्चामरसंप्रलम्ब
मुक्तरोदञ्चद्विजैराचितोयत्रकः पुष्पफलैःफलायमवतांभूयान्महामण्डपः१२।
ध्वजान्दिहस्तारचयन्तिकांश्चपंचहस्ता५न्सुपीतारक्तकृष्णनीलान्श्वेतासित
श्वेतसितान्दिगीशवाहान्वदेदिक१०करवंशशीर्षे।१३लोकेशवर्णास्त्वयुताः
पताकाःशैलेन्दुदैर्घ्यायतिका७१मध्ये।चित्रध्वजंदिक१०करदैर्घ्यवंशोत्रि

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मं·पू· दोलतं ३ प्रान्तगकिंकिरणीकम् । १४ क्रियासारे· मातङ्गवलमहिषसिंहमत्स्ये
४ गावाजिनः । वृषभंचयथान्यायंध्वजमध्येक्रमाल्लिखेत् । १५ दशादिक्पालपक्षे
मितरक्तवर्णेगरुडहंसवाहनेचक्रकमण्डल्वहे· इतिनिर्माणक्रमः अथमण्डप
पूजा· पूर्वद्वारमध्ये· द्वारश्रियैनमः · ऊर्ध्वदेहल्यैनमः· अधोदेहल्यैनमः· द्वारलं
भयोः· जयायनमः· विजयायनमः· द्वारकलशयोः· गंगायैनमः· यमुनायैन
मः· तोरणोपरि · इन्द्रायनमः· धात्रेनमः· भगायनमः· दक्षिणद्वारे · द्वारश्रि
यैनमः· ऊर्ध्वदेहल्यैनमः· अधोदेहल्यैनमः· द्वारलंभयोः· प्रणपशिलायनमः ४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सुशीलायनमः॰ द्वारकलशयोः॰ गोदायैनमः॰ कल्मायैनमः॰ तोरणोपरि॰ पूष्णेन
मः॰ मित्रायनमः॰ वरुणायनमः॰ पश्चिमद्वारे॰ द्वारश्रियैनमः॰ ऊर्ध्वदेहल्यैनमः
अधोदेहल्यैनमः॰ द्वारस्तंभयोः॰ नन्दायनमः॰ सुनन्दायनमः॰ द्वारकलशयोः॰ रे
वायैनमः॰ताप्यैनमः॰ तोरणोपरि॰ अर्यम्णेनमः विवस्वतेनमः॰ अंशुम्योनमः
उत्तरद्वारे॰ द्वारश्रियैनमः॰ऊर्ध्वदेहल्यैनमः॰ अधोदेहल्यैनमः॰ द्वारस्तंभयोः॰
चण्डायनमः॰ प्रचण्डायनमः॰ द्वारकलशयोः॰ वारुण्यैनमः॰ वैरण्यैनमः॰ तोरणोप
रि॰ त्वष्ट्रेनमः॰ सवित्रेनमः॰ विष्णवेनमः॰ शैवमण्डपेतु॰ वृषभंसंहितंस्थूलश्वे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मं·पू· जं · त्रिशूलाङ्कितानितोरणानि · द्वारस्तंभयोः · गणेशायनमः · स्कन्दायनमः · इति
५ पूर्वद्वारे · द्वारस्तंभयोः · पुष्पदन्तायनमः · कपर्दिनेनमः · इतिदक्षिणद्वारे · द्वारस्तं
भयोः · नन्दिनेनमः · वराहायनमः · इतिपश्चिमद्वारे · द्वारस्तंभयो · महाकालायन
मः · भृङ्गिनेनमः · इत्युत्तरद्वारे · एतानेवविशेषः · पूर्वद्वारे · ॐ अग्निमीडेपुरोहितं
यज्ञस्यदेवमृत्विजं · होतारंरत्नधातमं · इतिपठित्वा · आश्वत्थंवटंवाशंखचिन्हि ८
तं · ॐ सुहृढतोरणइहागच्छेहतिष्ठेत्यावाह्य · ॐ सुहृढतोरणायनमः इतिपाद्या
दिभिःपूजयेत् · तोरणपार्श्वयोः गहोइहागच्छ · ॐ गरोइहागच्छेत्यावाह्य · नौपू ५

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जयित्वा · द्वारेकलशंसंस्थाप्यध्रुवंपूजयेत् · दक्षिणद्वारे · इषेत्वोर्जेत्वावायव
स्थदेवोवः सवितापार्पयतुश्रेष्ठतमायकर्मण आप्यायध्वमघ्न्याऽइन्द्रायभा
गंप्रजावतीरनमीवाऽअयक्ष्मामावस्तेनऽईशतमाघसं॰ सोध्रुवाऽअस्मिनो
पतौस्यातबह्वीर्यजमानस्यपशून्पाहि · इतिपठित्वा · औदुम्बरोप्लाक्षंसचक्रम् ·
ॐसुभद्रनोरणस्फागच्छत्वावाह्य · तद्वारपार्श्वयोः सूर्यागारकावाह्य · द्वारेकल
शंस्थाप्य · तत्रधरामावाह्यपूजयेत् · पश्चिमद्वारे · अग्नऽआयाहिवीतयेगृणा
नोहव्यदातये · निहोतासत्सिबर्हिषि · इतिपठित्वा · प्लाक्षंऔदुम्बरंवासगदं ·

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मं॰पू॰ ॐ मुकर्मनोरराणइहागच्छेत्यावाह्य॰ द्वारपार्श्वयोः शुक्रभृत्यावावाह्य॰ द्वारेकलशं
६ संस्थाप्य॰ तत्रवाक्पतिमावाह्यपूजयेत्॰ उत्तरद्वारे॰ शन्नोदेवीरभिष्टयऽआपो
भवन्तुपीतयेशंयोरभिस्रवन्तुनइतिपठित्वा॰ वटंपिप्पलंसमपर्य॰ ॐ बुधोऽसौ
रराणइहागच्छेत्यावाह्य॰ द्वारपार्श्वयोः सोमकेतुनावाह्य॰ द्वारेकलशंसंस्थाप्य॰
तत्रविघ्नेशमावाह्यपूजयेत्॰ इतितोरणपूजांनिवर्त्य॰ पूर्वद्वारपार्श्वयोःकल
शद्वयंसंस्थाप्य॰ वामेऐरावतमावाह्यपूजयेत्॰ दक्षिणे॰ ॐ त्रातारमिन्द्रमवि
तारमिन्द्रꣳ हवेहवेसुहवꣳ शूरमिन्द्रम्॰ ह्वयामिशक्रंपुरुहूतमिन्द्रꣳ स्वस्तिनोम ६

घबाधात्विन्द्रः एह्येहिसर्वामरसिद्धसाध्यैरभिष्टुतोवज्रधरामरेश · सम्वीज्यमा
नोप्सरसांगणेनरक्षाध्वरंनोभगवन्नमस्ते · ॐ इन्द्रइहागच्छेहतिष्ठेत्यावाह्यपू
जयेत् · वज्रैरावतयुतपीतपताकध्वजेदक्षवामेचोच्छ्रित्यसंपूज्य · इन्द्रःसुरपतिः
श्रेष्ठोवज्रहस्तोमहाबलःशतयज्ञाधिपोदेवस्तस्मैनित्यंनमोनमःइतिनत्वा ·
साङ्गायसायुधायसवाहनायशचीशक्तिसहितायेन्द्रायेमंमाषभक्तबलिंसम
र्पयामि · इतिबलिंदत्वामार्जनंकृत्वाचामेत् · ऋग्वेदीयब्राह्मणौस्थाप्यौ · आग्ने
ये · कलशंसंस्थाप्य · वामेपुण्डरीकमावाह्यपूजयेत् · दक्षे · ॐ अग्निन्दूतंपुरोद

मं॰पू॰ ग्नेहव्यवाहमुपब्रुवे॰ देवाँ२॥ऽआसादयादिह॰ एह्येहिसर्वामरहव्यवाहमुनिप्रवर्यै
७ रभितोभिजुष्ट॰ तेजोवतोलोकगणेनसार्धंममाध्वरंपाहिकवेनमस्ते॰ ॐ अग्ने
इहागच्छेहतिष्ठेत्यावाह्यपूजयेत्॰ शक्तिमेषयुतेरक्तपताकध्वजेदक्षवामेचो
च्छ्रित्य॰ संपूज्य॰ आग्नेयःपुरुषोरक्तःसर्वदेवमयोव्ययः॰ धूम्रकेतुरजोध्यक्षस्तस्
मैनित्यंनमोनमः इतिनत्वा॰ माज्ञायमसवाहनायमातृधायस्वाहाशक्तिकाया
ग्नयेइमंमाषभक्तबलिंसमर्पयामि॰ इतिबलिंदत्वामार्जनंकृत्वाचामेत्॰ दक्षिणा
द्वारपार्श्वयोः वामेवामनमावाह्यपूजयेत्॰ दक्षे॰ यमायत्वामखायत्वासूर्यस्य ७

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्वाजपमे· देवस्त्वासविता मध्वानक्तु पृथिव्याः सं ॐ स्पृशस्पाहि· अर्चिरसि
शोचिरसि तपोसि· एह्येहि वैवस्वत धर्मराज सर्वामरै रर्चित धर्ममूर्त्ते· शुभाशुभा
नन्दयुजामधीश शिवाय नः पाहि मरवं नमस्ते· ॐ यम इहागच्छेह तिष्ठ त्वा वाह्य
पूजयेत्· इति महिषयुतोक्तस्य पताकध्वजे चोच्छ्रित्य· संपूज्य· महामहिषमा
रूढं इति इहस्तं महावलं· आवाहयामि यज्ञेस्मिन्पूजेयं प्रतिगृह्यताम्· इति न
त्वा· यमाय यमाङ्गाय यमायुधाय यमवाहनाय सर्वशक्तिसहिताय इमं माषभक्तबलिं
समर्पयामि· इति बलिं दत्वा मार्जनं कृत्वा चामेत्· यजुर्वेदीय ब्रालणोस्थापो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नं·रू· नैर्ऋत्ये· कलशद्वयंस्थाप्य· वामेकमुद्दंसंपूज्य· मोषूणःपरापरानिर्ऋतिईह
८ णावधीत्· यदीक्षतृष्णायासह· एह्येहिरक्षोगणनायकस्त्वंविशालवेतालपि
शाचसंघैः ममाध्वरंपाहिपिशाचनाथलोकेश्वरत्वांभगवन्नमस्ते· ह्रौं· ॐ
निर्ऋतेइहागच्छेहतिष्ठेत्यावाह्यपूजयेत्· खड्गसिंहयुतेनीलपताकध्वजेदक्ष
वामेवोच्छ्रित्य·सम्पूज्य· निर्ऋतिंखड्गहस्तंचसर्वलोकैकपालकम्· आवाह
यामियज्ञेस्मिन्पूजेयंप्रतिगृह्यतां· इतिनत्वा· निर्ऋतयेसाङ्गायसायुधायसवा
हनायकालिकाशक्तिसहितायइमंमासभक्तबलिंसमर्पयामि· इतिबलिंद ८

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्वामार्जनाचमनम् · पश्चिमे · कुंभद्वयंसंस्थाप्य · वामे अङ्गुनंसंपूज्य · नत्वाया
मिब्रह्मणावन्दमानस्तदाशास्तेयजमानोहविर्भिः अहेडमानोवरुणोहवो
रुशंसमानआयुःप्रमोषीः एह्येहियादोगणवारिधीनांगणेनपर्जन्य
सहाप्सरोभिः विद्याधरेन्द्रामरगीयमानपाहित्वमस्मान्भगवन्नमस्ते · दक्षे ·
ॐ वरुणइहागच्छेहतिष्ठेत्यावाह्यपूजयेत् · पाशमत्स्ययुतेश्वेतपताकेर
ध्वजेदक्षवामेवोच्छ्रित्य · संपूज्य · पाशहस्तंचवरुणमर्णसांपतिमीश्वर
म् · आवाहयामियज्ञेस्मिन्वरुणायनमोनमः इतिनत्वा · वरुणायसाङ्गा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यमायुधायसवाहनाय पद्मिनीशक्तिसहिताय॰ मार्जनाचमनं॰ ततस्तामवेरी
यद्वालरोगोस्थाप्यो॰ वायव्ये॰ कुम्भद्वयंसंस्थाप्य॰ वामेपुष्परक्तंसंपूज्य॰ वायोये
नेमहस्विरोरथासस्त्वेभिरागहि॰ नियुत्वान्सोमपीतये॰ इतिपठित्वा॰ एह्येहि
यज्ञेममरक्षणायमृगाधिरूढः महासिद्धसंघैः॰ प्राणाधिपः कालकवेःसहायो
गृहाणपूजांभगवन्नमस्ते॰ इत्थं॰ ॐवायोइहागच्छइहतिष्ठ स्वावाह्यपूजयेत्॰
अंकुशहस्ताययुक्तेभूम्रपताकध्वजेरक्षवामेचोक्तुम॰ संपूज्य॰ वायुमाकाश
गंचैवपवनंवेगवद्गतिम॰ आवाहयामियज्ञेस्मिन्पूजेयंप्रतिगृह्यताम॰ इतिनत्वा ९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सांगाय सायुधाय सवाहनाय वायवे मोहिनीशक्तिसहिताय॰ मार्जनाचमने॰
उत्तरद्वारे॰ कलशद्वयं स्थाप्य॰ वामे सार्वभौमं संपूज्य॰ दक्षे॰ आप्यायस्व समेतु ते
विश्वतः सोम वृष्ण्यं॰ भवा वाजस्य संगथे॰ एह्येहि यज्ञेश्वर यज्ञरक्षां विधत्स्व न
क्षत्रगणेश सार्द्धम्॰ सर्वौषधीभिः पितृभिः समेत्य गृहाण पूजां भगवन्नमस्ते॰
ॐ सोम इहागच्छ इह तिष्ठ इत्यावाह्य पूजयेत्॰ गजवाजियुते हरित्पताकध्वजे दक्ष
वामे चोच्चैःश्रवसम्पूज्य॰ सर्वनक्षत्रमध्येषु सोमो राजा व्यवस्थितः तस्मै सोमा
य देवाय नक्षत्रपतये नमः इति नत्वा॰ सोमाय साङ्गाय सायुधाय सवाहनाय

मं.पू. चित्रिणीशक्तिसहिताय· मार्जनाचमने· नत्वाथर्ववेदिनौ ब्राह्मणौ स्थाप्यौ· ईशा
१० ने· ॐ भद्रंयं स्थाप्य· वामे सुप्रतीकं सम्पूज्य· रुद्रे· एह्येहि विश्वेश्वर नस्त्रिशूल
कपालखट्वाङ्गधरेण सार्द्धम्· लोकेश यज्ञेश्वर यज्ञसिद्ध्यै गृहाण पूजां भगवन्नम
स्ते· देव सवितः प्रसुव यज्ञं यज्ञपतिं भगाय· दिव्यो गन्धर्वः केतपूः केतन्नः पुनातु
र्वाचस्पतिर्वाचन्नः स्वदतु· ॐ ईशानेहागच्छ इह तिष्ठेत्यावाह्य पूजयेत्· शूलहस्त
मयुतं श्वेतपताकध्वजे दक्षवामे चोच्छ्रितं सम्पूज्य· वृषभस्कन्धमारूढं शूलह
स्तं त्रिलोचनम्· आवाहयामि यज्ञेऽस्मिन्पूजयग्रुतिगृह्यताम्· इति नत्वा· ईशा १०

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नायसाङ्गायसायुधायसवाहनायगौरीशक्तिसहितायः मार्जनाचमने· निर्ऋ
तिवरुणयोर्मध्ये· कलशंस्थाप्य· सहस्रशीर्षापुरुषःसहस्राक्षःसहस्रपात्· स
भूमिंसर्वतःस्पृत्वात्यतिष्ठद्दशाङ्गुलम्· एषोहिपातालधरामरेन्द्रनागाङ्गनाकिन्न
रगीयमानः रक्षोधिपेन्द्रामरलोकसंघैरनन्तरक्षाश्वरमस्मरीयम्· ॐ अनन्तइ
हागच्छइहतिष्ठेत्यावाह्यपूजयेत्· चक्रगरुडयुतेश्वेतपताकध्वजेदक्षवामेचो
च्छितंसंपूज्य· योसावनन्तरूपेणब्रह्माण्डंसचराचरम्· पुष्पवद्धार्यतेमूर्ध्नि
तस्मैनित्यंनमोनमः इतिनत्वा· अनन्तायसाङ्गायसायुधायसवाहनाय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

 लक्ष्मीशक्तिसहितायमार्जनाचमने॰ पूर्वैशानयोर्मध्ये· ॐ ब्रह्मयज्ञानंप्रथ
 मंपुरस्ताद्विसीमतःसुरुचोवेनआवः सबुध्न्याउपमाअस्यविष्ठाः सतश्चयोनिमस
तश्चविवः एह्येहिसर्वाधिपतेसुरेन्द्रलोकेनसार्धंपितृदेवताभिः सर्वस्यधाता
स्यमितप्रभावोविशाध्वरंनःसततंशिवाय· ॐ ब्रह्मन्इहागच्छइहतिष्ठेत्यावा
ह्यपूजयेत्· कमण्डलुहंसयुतेरक्तपताकाध्वजेदक्षवामेचोच्छ्रित्यसंपूज्य· प
द्मयोनिश्चतुर्मूर्त्तिर्वेदावासपितामह· यज्ञाध्यक्षश्चतुर्वक्त्रलक्ष्मैनित्यनमोन
मः इतिपठित्वा· ब्रह्मणेसाङ्गायसायुधायसवाहनायसावित्रीशक्तिसहिताये

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मंमाषभक्तबलिंसमर्पयामि· इतिबलिंदत्वामार्जनाचमनेकुर्यात्· मंडपमध्ये
इन्द्रस्यविष्णोवरुणराज्ञ आदित्यानांमरुतांशर्द्धउग्रं· महामनसांभुवनच्य
वानांघोषोदेवानांजयतामुदस्थात्· इतिमंत्रेणशुक्लंकिंकिणीघण्टाचामर
युक्तंमहाध्वजमुच्छ्रितम्· ब्रह्मजज्ञानमितिमंत्रेण· ब्रह्माणंसंपूज्य· मंडपांतर्गत
वेदिकाग्नेयकोणस्तंभे· वसुधामावाह्य· ॐ वसुधायैनमः इतिपूजयेत्· एवं
नैर्ऋत्येभद्राम्· वायव्येऽदितिम्· ईशानेनन्दाम्· वायु १२ स्तंभेषु आग्नेयमा
रभ्यपूजयेत्· भूतिं १ सरस्वतीं २ पूर्वसन्ध्याम् ३ मध्यमसन्ध्यां ४ पश्चिमसन्ध्यां ५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मं०पू० गायत्रीं ६ सावित्रीं ७ बृहस्पतीं ८ अदितिं ९ विनतां १० पूर्णिमां ११ सिनीवालीं
१२ १२ एभिर्मंत्रैः प्रत्येकं पूजयेत्. मराउप १६ लंभेषु. सर्वेभ्यो देवेभ्यो नमः वंशो
श्रकिन्नरेभ्यो नमः पृष्ठेत् रणादिषु पन्नगेभ्यो नमः अथ भूतबलिः मराउपभू
र्वेदिशिभूमिमुपलिप्य बलिं दद्यात्. त्रैलोक्ये यानि भूतानि स्थावराणि चरा
णि च. ब्रह्मविष्णुशिवैः सार्द्धं रक्षां कुर्वंतु तानि मे. देवदानवगंधर्वा यक्षरा
क्षसपन्नगाः ऋषयो मनवो गावो देवमातर एव च. सर्वे मम माध्वरे रक्षां प्रकु
र्वंतु मुदान्विताः ब्रह्मा विष्णुश्च रुद्रश्च लोकपालगणैः सह. रक्षंतु मंडपं सर्वे १२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

घ्नंतु रक्षांसि सर्वतः त्रैलोक्यवासिभ्यः स्थावरभूतेभ्यश्चरभूतेभ्यो बलिर्नमः
ब्रह्मणे बलिर्नमः विष्णवे बलिर्नमः शिवाय बलिर्नमः देवेभ्यो बलिर्नमः।
यक्षेभ्यो बलिर्नमः पन्नगेभ्यो बलिर्नमः ऋषिभ्यो बलिर्नमः मनुष्येभ्यो ब
लिर्नमः देवमातृभ्यो बलिर्नमः इति माषभक्त बलिं दद्यात्॥ ॥इति मंड
पपूजाविधिः॥ कोटिहोमादौ तु देवतास्थापनार्थं कुण्डस्थण्डिलादि रच
नां कुर्यात्। शिवादिमूर्तिप्रतिष्ठायां तु देवादिमूर्तिस्नानार्थं मण्डपाद्युत्त
रे भागे वा स्वस्थले स्नानमंडपं सूक्ष्मं कुर्यादिति। सन्नाहमण्डपे तु मध्यवेद्याम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

 परिसम्पन्नलोकपतिनिधिभूतान्सम्पन्नवशान्कल्पयेदिति विशेषः अलम्॥ ॥
 अथमंडपदानविधिः सर्वकर्मसमाप्तौमंडपस्यपश्चिमद्वारदेहलींसमुप
श्य॰ कुशादीन्यादायसंकल्पंकुर्यात्॰ अद्येहामुकगोत्रस्यामुकशर्मणोम
मइहजन्मनिजन्मान्तरेवास्वकर्माभ्यासवशाद्बाल्यावस्थारारभ्यवार्द्धकान्ता
स्ववस्थासुजाग्रत्स्वप्नसुषुप्तिषुच देशकालसंगवशेन कामक्रोधादिवशाभि
भूतैर्मनोवाक्कायकर्मेन्द्रियव्यापारैर्ज्ञानाज्ञानतःकृतानांक्रियमाणानांभुक्त्वा
र्द्धलघुगर्वादिसंकरीकरणादिपरसंसर्गजातानांचिरकालभ्यसितानांबहूनां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बहुविधानांसकलाघचयानांनज्जन्मैतत्स्थूलशरीरोत्पन्नपीडाजनकनाना
विधरोगाणामत्यंतनिरसनपूर्वकस्त्रीपुत्रसेवकनरेन्द्रादिद्वारानानाविधसुख
भोगोत्तरश्रुतिस्मृतिपुराणागमोक्तनारायणचरणोपसादिनीभक्तिफलावाप्त
येस्वस्यचांतेमुक्ताजालविभूषितकिंकिणीशब्दमंडितानेकाप्सरोगणसेवित
हैमविमानारोहणपूर्वकामुकलोकनिवासार्थंविशेषतोमुकककर्मांगभूतदि
व्यालप्रतिमाध्वजपताकासहितदीपकलशग्रहवेदीवास्तुवेदीसहितगणे
शग्रहवास्तुप्रतिमायुतंमंडपंविश्वकर्मदैवतंयथानामगोत्राययथानामशर्म

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मं·पू· णेआचार्यायदानंमहंगुरुस्सृजे · तत्सच्चमम ततोदानप्रतिष्ठादानम् · ततः

१४ गुरुरद्युतोभञ्जीतइति · ततोब्रह्मार्पणम् ॥ ॥इतिमण्डपदानविधिः॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१३ ॥ अथजन्मोत्सवविधिः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रीगणेशाय नमः ॥ अथ जन्मोत्सवविधिः ॥ तत्र प्रयोगः प्रातः कृत्यानि लोकवर्त्तेन
जन्मो तिलामलकस्नानो विदितनित्यक्रियो यजमानो हस्तौ पादौ प्रक्षाल्यासनं उप
१ पविश्य दीपं प्रज्वाल्याचम्य ॥ सामान्यार्घ्यस्थापनम् विधाय ॥ ततः कर्मपात्रोदक
कुशैर्गृहीत्वा ॥ ॐ अपवित्रः पवित्रो वा सर्वावस्थां गतोपि वा ॥ यः स्मरेत्पुण्डरीका
क्षं स बाह्याभ्यन्तरः शुचिः ॥ कुशादिकमादाय ॥ ॐ तत्सत् पूर्वोक्तसंकल्पसिद्धि
रस्तु .... गोत्रस्य .... प्रवरस्य ...... मम श्रुतिस्मृतिपुराणोक्तफला १
वाप्तये विशेषतः मदीयवर्षवृद्धौ जन्मोत्सवदिने आयुरारोग्यैश्वर्याद्यभ्युदय प्र रामः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लग्नाघस्यर्थं गणेश पूजनं पुण्याहवाचनं दीप कलश स्थापनं पूजनं मार्कण्डे
या षष्ठ्य चीरंजीवि पूजनं गौर्यादि देवता पूजनं तथाच षष्ठीकां स्वनक्षत्रं
च स्वतिथीं च भानू विघ्नेशं च यथामिलितोपचारैः पूजन महं करिष्ये ॥
ततो दीप कलश गणपतिं च यथा मिलितोपचारैः पूजयेत् ॥ अथ चीरं
जीवि पूजा ॥ गोरोचनादि अष्टदल पद्मं वस्त्रे लिखित्वा ॥ वेदिकाद्युपरि
स्थापयित्वा ॥ कर्णिकायां पंचगव्यादिभिः शुद्धां सुवर्ण प्रतिमां संस्थाप्य
अक्षतादि समर्प्य दक्षकरं गृहीत्वा ॥ पूर्वदले ॥ यस्यकूर्मो गृ० ॥ कच्छपी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

जन्मा २

जल्कवर्णाभं सुपुस्तकलशास्करम् ॥ सर्वशास्त्रार्थतत्वज्ञं ध्यायेद् व्यास
मुनिं सदा ॥ ॐ व्यास इहागच्छेति पंचोपचारैः पूजयेत ॥ ॐ व्यासाय नमः ॥
प्रार्थना ॥ सर्वशास्त्रार्थतत्वज्ञं ध्याये व्यासमुनिं सदा ॥ शास्त्रमूल प्रवक्ता
रं पारासर सुतं भजे ॥ आग्नेयदले ॥ ॐ परशुराम इहागच्छेत्यादि ॥ यमद
ग्निकुलोद्भूतं व्योमाञ्जन समप्रभम् ॥ ध्याये परशुरामं वै दधानं परशुं वरम्
॥ ॐ परशुरामाय नमः ॥ प्रार्थना ॥ कार्तवीर्यस्य हन्तारं परशुहस्तं महाब
लम् ॥ एकविंशानि निःक्षत्रं कुर्वन्तं त्वा नमाम्यहम् ॥ दक्षिणे · अश्व · थाम्न

२ रामः

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

म्‌ ॥ ॐ अश्व॰थाम्न इ० ॥ श्याम वर्णं महातेजः खङ्ग पाणिं वरः परम्‌ ॥ अश्व
॰त्थामा नमा चार्य्यं ध्यायेद्द्रोण सुतं शिवम्‌ ॥ ॐ अश्व॰थाम्ने नमः ॥ प्रार्थना ॥
ब्राह्मणाय नमस्तुभ्यं द्रोणाचार्य सुताय वै ॥ वेद वेदाङ्ग पूर्णाय अश्व॰था
म्ने नमो नमः ॥ नैरृत्ये कृपाचार्यम्‌ ॥ ॐ कृपाचार्य इ० ॥ ॐ कृपाचार्याय नमः
धनुर्बाण धरं वीरं श्वेत पीत द्युतिं परम्‌ ॥ भार द्वाज कुलो॰पन्नं रूपं ध्याये
मला पहम्‌ ॥ कृपाचार्याय नमः ॥ प्रार्थना ॥ राजर्षभ नमस्तुभ्यं गौतम कुलो
द्भव ॥ कृपाचार्य सदा नुष्ठ धीर वीर पराक्रमः ॥ पश्चिमे बलिम्‌ ॥ ॐ बले
CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

जन्मो

३

ईशागच्छ०॥ कृष्ण तेजो द्विबाहुं च सदा पाताल मस्थितम्॥ रक्ता भयकरं
ध्याये विलंनं बलराजयकम्॥ ॐ बलये नमः॥ प्रार्थना॥ भूमिं स्वर्गं च पा
तालं येन दत्तं द्विजन्मने॥ भविता पो मरुवन्यां महेन्द्र ले नमो बले॥ वायवे प्रह्
दम्॥ हिरण्य कश्यपोः पुत्रं सदा पाताल मे स्थितम्॥ वरा भयकरं ध्याये प्रल्हा
द वैष्णवोत्तमे॥ ॐ प्रल्हाद ई०॥ प्रल्हादाय नमः॥ प्रार्थना॥ कश्यप पक्ष कुलो ३
द्भूतं रक्त वर्णं द्विबाहुकम्॥ दैत्यसेना परित्यक्तं दीनि पोषं च वैष्णवम्॥ ॐ नमो रामः
हनुमन्तम्॥ वायुपुत्रं महा वीरं रक्त वर्णं त्रिलोचनम्॥ कंद मूल फल प्रीतं

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हनूमन्तं नमाम्यहम्॥ ॐ हनूमन् इ०॥ ॐ हनूमते नमः॥ प्रार्थना॥ अञ्जनीग
र्भसंभूतं जानकीशोकनाशनम्॥ कपीश मस्तु हन्तारं वन्दे लंकाभयंकरम्॥
ईशाने विभीषणम्॥ पौलस्त्यकुलसंभूतं कुंकुमाभं द्विबाहुकम्॥ राक्षसो
घैपरि रत्न सदा ध्याये विभीषणम्॥ ॐ विभीषण इ०॥ ॐ विभीषणाय नमः
प्रार्थना॥ लंकावास नमस्तुभ्यं पौलस्त्यकुलसंभव॥ राक्षसाधिपते देव न
मस्तेस्तु विभीषणः॥ इति क्रमेण पञ्चोपचारैः पूजयेत्॥ आग्नेये ॐ गुरुभ्यो
नमः॥ देवेभ्यो नमः॥ नारायणाय नमः॥ प्रजापतये नमः॥ पितृभ्यो नमः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जन्मदेवतायै नमः ॥ स्थानदेवतायै नमः ॥ अष्टदिक्षु ॥ ॐ कार्त्तिकेयाय नमः ॥
वासुदेवाय नमः ॥ क्षेत्रपालाय नमः ॥ पृथिव्यै नमः ॥ अद्भ्यो नमः ॥ तेजसे न
मः ॥ वायवे नमः ॥ आकाशाय नमः ॥ पश्चिमांसे ॐ गणपतये नमः ॥ दु
र्गायै नमः ॥ कुलदेवतायै नमः ॥ महालक्ष्म्यै नमः ॥ महाकालाय नमः ॥ काला
य नमः ॥ युगाय नमः ॥ संवत्सराय नमः ॥ मासाय नमः ॥ पक्षाय नमः ॥ ति
थ नमः ॥ रात्र्यै नमः ॥ वासराय नमः ॥ नक्षत्राय नमः ॥ लग्नाय नमः ॥
अष्टदलेषु ॥ शिवायै नमः ॥ संभूत्यै नमः ॥ प्रीत्यै नमः ॥ सन्नत्यै नमः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनसूयायै नमः॥ क्षमायै नमः॥ विधवे नमः॥ भद्रायै नमः॥ अष्टदि
ग्भागे॥ इन्द्राय नमः॥ अग्नये नमः॥ यमाय नमः॥ निरृतये नमः॥ व
रुणाय नमः॥ वायवे नमः॥ धनदाय नमः॥ ईशानाय नमः॥ इन्द्रेशान
मध्ये॥ ब्रह्मणे नमः॥ निरृति वरुण मध्ये॥ अनन्ताय नमः॥ मध्ये विशेष
तो मार्कण्डेय विचिन्तयेत्॥ आवाहनम्॥ आगच्छ गच्छ ब्रह्मन्तपोध
श्रेष्ठ मृकण्डुजः॥ क्रियमाणां मया पूजां गृहाण मुनि सत्तमः॥ आसनम्॥
नाना रत्न समायुक्तं कार्तस्वर विनिर्मितम्॥ मृकण्डु सूनोश्रीमत्सर्वमास

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तं प्रतिगृह्यताम् ॥ पाद्यम् ॥ यद्भक्तिकरणाद्यो चिरंजीवी त्वमायुषः
जन्मो ॥ तस्मै ते चरणाब्जाय पाद्यं शुद्धाय कल्पते ॥ अर्घ्यम् ॥ तापत्रयहरं दि-
५ व्यं परमानन्दलक्षणम् ॥ तापत्रयविनिर्मुक्तं तवार्घ्यं कल्पयाम्यहम् ॥ आचमनीय-
म् ॥ कर्पूरवासितं तोयं मंदाकिन्याः समाहृतम् ॥ आचम्यतां मुनिश्रेष्ठ मया
दत्तं हि भक्तितः ॥ स्नानम् ॥ परमानन्दबोधाब्धिनिमग्नजलमूर्तये ॥ सा-
ङ्गोपाङ्गमिदं स्नानं कल्पये मुनिपुंगवः ॥ पञ्चामृतम् ॥ दुग्धेदध्नासर्पि- ५
साच क्षौद्रेण सितया पिच ॥ मेदीर्घमायुषं यव सुस्नातस्त्वं मुनीश्वरः ॥ रामः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पुनः स्नानम् ॥ शुद्धोदकम् ॥ पुनराचमनीयं समर्पयामि मार्कण्डेयादि अष्ट
चीरञ्जीविभ्यो नमः ॥ उच्छिष्टो प्यशुचिर्वापि यस्य स्मरण मात्रतः ॥ शुद्धिमाप्नो
ति तस्मैते पुनराचमनीयकम् ॥ वस्त्रम् ॥ सर्वभूषाधिके दिव्ये लोकलज्जानिवा
रणे ॥ मयोपपादिते तुभ्यं वाससी प्रतिगृह्यताम् ॥ यज्ञोपवीतम् ॥ यस्य शक्तित्रये
णेदं संप्रोतमखिलं जगत् ॥ यज्ञसूत्राय तस्मैते यज्ञसूत्रं प्रकल्पयेत् ॥ पुनराच
मनम् ॥ चंदनम् ॥ श्रीखण्ड चन्दनं दिव्यम् ॰ ॥ अक्षता ॥ अक्षतां धवलां दिव्यान् श
हाण वरदो नम ॥ सर्वे मन्मुत्तमं त्वं हि चाक्षयं कुरु मे फलम् ॥ पुष्पाणि ॥ पद्मा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जन्मो ६

दिनिसुगंधिनी मालत्यादी निवेसुने ॥ मयाहृतानि पुष्पाणि पूजार्थं प्रति
गृह्यताम् ॥ धूपदानं समर्पयामि मारुरोदे याद. अष्टचीरञ्जी वीभ्योन
नमः ॥ अथ नैवेद्यम् ॥ अन्नं चतुर्विधं स्वादु रसैः षड्भि समन्वितम् ॥ भू
तानां जीवनं चैव नैवेद्यं प्रतिगृह्यताम् ॥ पुनराचमनम् ॥ ताम्बूलं पूगीफ
लं च ॥ महद्दिव्यं पूगफलं नागवल्ली दलैर्युतम् ॥ लवङ्गादि समायुक्तं मु
निन्द्र प्रतिगृह्यताम् ॥ नारिकेलम् ॥ इदं फलं समर्पयामि. अष्टचीरञ्जी ६
वीभ्यो नमः ॥ देव दक्षिणा ॥ हिरण्यगर्भेति ॥ नीराजनम् ॥ चन्द्रादित्यो चनि. रामः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पुष्पाञ्जलीः ॥ इमानि पुष्पाणि मनोहराणि सुरैःसुरैणामपि दुर्लभानि ॥
कल्पद्रुमानि द्रुमजानि तानि पुष्पाञ्जलिं मेस्तु सुखाय नित्यम् ॥ प्रदक्षिणा
॥ यानि कानि ० ॥ नमस्कारः ॥ आयुःप्रद महाभाग सोमवंश समुद्भवः ॥ तपो
निधे मुनिश्रेष्ठ मार्कण्डेय नमोस्तुते ॥ अथ प्रार्थना ॥ मार्कण्डेय नमस्तेस्तु
सप्तकल्पान्तजीवन ॥ चिरंजीवि यथा त्वं भो भविष्यामि तथा मुने ॥ रूप
वां चित्तवां श्चैवं श्रिया युक्तश्च सर्वदा ॥ मार्कण्डेय महाभाग सप्तकल्पा
न्तजीवन ॥ आयुरारोग्य सिध्यर्थं प्रसीद भगवन्मुने ॥ चिरंजीवि यथा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

जन्मो
७

त्वंतु मुनीनां प्रवरः द्विजः ॥ कुरुष्व मुनिशार्द्दूल तथा मां चिरजीवनम् ॥ आयु
रारोग्य सिध्यर्थं मस्माकं वरदो भव ॥ भो मार्कण्डेयादि अष्टचीरजीवि
भ्रमस्व ॥ ततो ईशान भागे षष्ठि केदेवि इहागच्छेह तिष्ठे स्थापयित्वाय
थामिलितोपचारैः पूजयेत् ॥ जगन्मातर्जगद्धात्रि जगदानंदकारिणि
॥ प्रशीद मम कल्याणि नमोस्तु षष्ठि देवते ॥ रूपं देहि यशोदेहि भद्रं भव
ति देहिमे ॥ पुत्रान्देहि धनं देहि सर्वान् कामान् प्रदेहिमे ॥ ततः षष्ठिकादे
व्यै नमः ॥ अथ प्रार्थना ॥ ॐ आद्य भूतासि भूतानां ब्रह्मणा निर्मितं परः ॥

७
रामः

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तस्मां मां प्रजवन्कृत्वा पालयत्वं नमोस्तुते ॥ ततः ॐ नृपगणादिभ्यो नमः ॥ इति सं
पूज्य ॥ प्रार्थना ॥ नृपगणा हकुमाना प्र गौरि चकुठ पूजना ॥ आयुर्दात्र्यो भव
न्त्वेना अद्यजन्म दिने मम ॥ ततः तस्मिन्नेव वस्त्रे अष्टदलादिह यथा वक्ष्य
शं वक्ष्यमाण मंत्रैः पूजयेत् ॥ पीत वस्त्र गुग्गुल निंब सिद्धार्थ गोरोचना
दिकं संक्षिप्य पीत सूत्रेण वेष्ट्य मुनीनामग्रे संस्थाप्य तत्र पूजयेत् ॥ ॐ ग
णानान्त्वा० ॥ ॐ आकृष्णेन० ॥ इति मंत्राभ्यां पोटलीकायां भानु विघ्नेशौ पू
जयेत् ॥ तत्रैव सर्वेभ्यो देवेभ्यो नमः ॥ ततः पीत वस्त्रे वेष्टित पोटलिकां दक्षि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ज॰को॰ णा भुजे धारयेत्॥ तत्र मंत्रः॥ ॐ मार्कण्डेय महाभाग आयुरारोग्यदायक॥ शु
८ भदो विघ्नहन्तारो भानु विघ्नेश स्ववचा॥ धारयामि भुजे दक्षे मम कल्याणहे
तवे॥ पूरयध्वं सदास्माकं कामनाश्च मनोरथाः॥ इति मंत्रेण बाहौ धारयेत्
॥ ततः स्वगृह्योक्त विधिनाग्निं संस्थाप्य पंचवारुणी होमपूर्वकं पूजित देव
ताभ्यो यथाशक्त्या हुतिं दत्वोत्तराङ्ग होमं कुर्यात्॥ पूर्णपात्रदानम्॥ अद्य
कृतैतत्जन्मोत्सव कर्मणः पूर्णतायाः पूर्णार्थं पूर्णपात्रं प्रजापति दैवतं अ ८
मुक गोत्रायेत्यादि॥ अथ तिल सुवर्ण तण्डुल घृत गोदानं कृत्वा॥ कौश्यपा रामः

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्रदानम्॥ ततो ब्राह्मणेभ्यः तिलगुडदुग्धं दत्वा स्वयमपि वक्ष्यमाणमंत्रेण
पिबेत्॥ ॐ सतिलं गुडसंमिश्रं मंजल्युर्दुमिदं पयः॥ मार्कंडेयाद्वरं ल
ब्ध्वा पिबाम्यायुर्विवृद्धये॥ ततोऽग्न्यादिग्रहाणां दानम् कर्तव्यम्॥ अ
थ दक्षिणादानम्॥ ततो द्यौः शान्तिरित्यादि मंत्रैः कलशाभिषेकं संरक्ष्य
वस्त्राण्याचार्याय निवेद्य॥ ततः पश्चाद्दृष्टलिङ्गियान्॥ ततः शकुंभक्षणं
तिलवपनं मत्स्यमोचनादिकं कृत्वा॥ विप्रान् संभोज्य नैरुज्जातो बंधुभिः
सह हविष्यैकभक्षं चरेत्॥ गोरोचनादि मङ्गलद्रव्याणि संचाल्य संह

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ष्ठेत् ब्रह्मचर्ययुतोहोरात्रं तिष्ठेत् ॥ ६ इति जन्मोत्सवविधिः समाप्तं शुभम्
॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथघृतच्छायाविधिः १४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

घृ·छा· श्रीगणेशायनमः अथघृतच्छायाविधिः कांश्यंताम्रंवा पात्रमाज्यपूरितंसद्रव्यं
१ कृत्वा· कुशैर्दूर्वाभिर्वामंत्रेणाभिमंत्रयेत्· आज्यंपरमयज्ञीयमाज्यंतेजोमयोनि॰
धिः आज्यंहिदेवदेवानांप्रियमाज्येस्थितंजगत्· तदाज्यवीक्षणेभक्त्याकृतेमङ्गल
माप्नुयात्· घृतस्पर्शनमंत्रः ज्ञानतोज्ञानतोवापिमनोवाक्कायकर्मभिः कृतंयत्
पातकंसर्वंतन्मेप्रणाशमुपगच्छतु· इत्याज्यंसंस्पृश्य दूर्वास्पर्शने· याक्षीरसागरो
त्पन्ना दूर्वापीयूषसंभवा· तासांस्पर्शनमात्रेणसर्वपापैःप्रमुच्यते· इतिदूर्वांसंस्पृ॰
श्य· तेजोसीतिपरमेष्ठिकऋषिस्त्रिष्टुप्छन्दः आज्यंदेवता आज्यावेक्षणेविनियोगः· १

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ तेजोसिशुक्रमस्यमृतमसिधामनामासिप्रियन्देवानामनाधृष्टन्देवयजनमसि·
ध्रुवासिध्रुवोयंयजमानोस्मिन्नायतनेप्रजयापशुभिर्भूयात्· घृतेनद्यावापृथि
वीपूर्येथामिन्द्रस्यछदिरसिविश्वजनस्यछाया· अलक्ष्मीर्यच्चदोषस्थंमेसर्वगात्रे
व्यवस्थितं· तत्सर्वंशमयाज्यत्वंलक्ष्मींपुष्टिंचवर्द्धय· इतिमन्त्रेणछायादर्शनंकृत्वा·
[illegible]वाक्यं· अद्येहममसर्वारिष्टपरिहारार्थंइदंस्वमुखावलोकितंकांस्यपा
त्रस्थंससुवर्णमाज्यंमृत्युंजयदैवतंयथानामगोत्रायथानामशर्मणेब्राह्मणा
यदातुमहमुत्सृजे· तत्सन्नमम· प्रार्थना· कामधेनोःसमुद्भूतंदेवानामुत्तमंहविः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पृ॰ दा॰ आयुर्वृद्धिकरं दातुराज्यंपात्रसदैवमाम्· अद्येह· कृतैतद्वलोकितकांस्यपात्रस्थ
२ सप्तधान्यस्थानप्रतिष्ठासाङ्गतासिद्ध्यर्थं इमां दक्षिणां ताम्रं सूर्यदैवतं यथानामगो
गाययथानामशर्मणे ब्राह्मणाय दातुमहमुत्सृजे· तन्सन्ममः॥ ॥इतिछत
च्छायाविधिः॥ ॥ ॥ ॥ ॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथगोदानविधिः १५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गोदा. श्रीगणेशायनमः अथगोदानविधिः तत्रप्रथमंसुशीलांपयस्विनींगामानीय·
१ इरावतीधेनुमतीहिभूतंसूयवसिनीमनवेदशस्या· व्यस्कभ्नारोदसीविष्णवेते
दाधर्थपृथिवीमभितोमयूखैःस्वाहा· नमोगोभ्यःश्रीमतीभ्यःसौरभेयीभ्यएवच·
नमोब्रह्मसुताभ्यश्चपवित्राभ्योनमोनमः इतिमंत्रेणपाद्यार्घादिभिर्गांसंपूज्य· घं
टांगलेबध्नीयात्· शृंगौसन्यांस्वर्णशृंगौरौप्यखुरांताम्रपृष्ठांमुक्तालांगूलांकांस्य
पात्रोपदोहनांवस्त्रयुगच्छन्नांगांविधाय· देयब्राह्मणंचसंपूज्य· तर्पणमंत्रमाह· ॐ
मनोमेतर्पयतवाचंमेतर्पयतप्राणांमेतर्पयतचक्षुर्मेतर्पयतात्मानंमेतर्पयतप्रजां १

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मेतर्पयनपश्चन्मेतर्पयत्तगणान्मेतर्पयन्तगणामेमाविन्हषन्· देवामनुष्याऋषय
यः पितरः पन्नगाः खगाः गंधर्वाः किन्नराः सिद्धाः साध्यारुद्रामरुद्गणाः स्थावराजं
गमाश्चैवयेचत्रैलोक्यवासिनः दानवायक्षरक्षांसिभूतप्रेतपिशाचकाः तेसर्वेतृ
प्तिमायान्तुगोपुच्छोदकतर्पणैः इतिगोपुच्छेनतर्पणंकृत्वा· कुशाजलादीन्यादा
य· अद्येहमम· श्रुतिस्मृतिपुराणागमोक्तफलावाप्तये अमुककर्मणः षाड्गुण्यफ
लप्राप्त्यर्थंगोरोमतुल्यवत्सरावधिसकलभोगपरिपूर्णस्वर्गलोकप्राप्तिकामोहे
मश्रृङ्गींरौप्यखुरांकांस्यपात्रोपदोहनांवस्त्रयुगच्छन्नांमुक्तालांगूलांसघंटांइमां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पयस्विनीं सवत्सां गां रुद्रदैवतां कांयथानामगोत्राययथानामशर्मणे ब्राह्मणा
यदातुमहमुत्सृजे· तत्सन्नमम· गांप्रार्थयेत्· कपिलेसर्वदेवानां पूजनीयासि
रोहिणि· तीर्थदेवमयी यस्मादतः शान्तिं प्रयच्छ मे· ब्राह्मणंच प्रार्थयेत्· देवमू
र्त्तिधरो विप्र विष्णुस्त्वं स्वयमागतः त्वत्प्रसादात्कृतं कर्म परिपूर्णं भवेन्मम· ततो
दानप्रतिष्ठादानम् अद्येह कृतैतत्सवत्सागोदानप्रतिष्ठार्थं कृतासिद्ध्यर्थं इदं
सुवर्णं वह्निदैवतं दानप्रतिष्ठार्थं ब्राह्मणाय दातुमहमुत्सृजे· इति दत्त्वा· ब्राह्म
णात्तोऽभिषेकं कारयेत्· ॥ ॥ इति गोदानविधिः॥ ॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथाभिषेकार्थोरस्मंगाः १५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अभि॰ अथाभिषेककार्यार्थोक्तमंत्राः अग्नेःपश्चिमतोभद्रासनोपरिनिविष्टंयजमानंसप॰
१ रिवारंशांतिकलशोदकेनाम्रपल्लवेनाभिषिंचेयुरेभिर्मन्त्रैः ॐसर्वेसमुद्राःसरितः
स्तीर्थानिजलदानदाः आयान्तुयजमानस्यदुरितक्षयकारकाः ॐदेवस्यत्वा॰
सवितुःप्रसवेश्विनोर्बाहुभ्याम्पूष्णोहस्ताभ्याम्॰ सरस्वत्यैवाचोयन्तुर्यन्त्रियेदधा
मिबृहस्पतेष्ट्वासाम्राज्येनाभिषिंचाम्यसौ॰ देवस्यत्वासवितुःप्रसवेश्विनोर्बाहु॰
भ्याम्पूष्णोहस्ताभ्याम्॰ सरस्वत्यैवाचोयन्तुर्यन्त्रियेणाऽग्नेःसाम्राज्येनाभिषिञ्चा
मि॰ देवस्यत्वासवितुःप्रसवेश्विनोर्बाहुभ्याम्पूष्णोहस्ताभ्याम्॰ अश्विनोर्भैष॰ १

ज्येनतेजसेब्रह्मवर्च्चसायाभिषिञ्चामिसरस्वत्यैभैषज्येनवीर्य्यायान्नाद्यायाभि
षिञ्चामीन्द्रस्येन्द्रियेणबलायश्रियैयशसेभिषिञ्चामि ३ कोसिकतमोसिक
स्मैत्वाकायत्वा· सुश्लोकसुमङ्गलसत्यराजन्· ४ शिरोमेश्रीर्य्यशोमुखंत्विषिः
केशाश्चश्मश्रूणि· राजामेप्राणोऽअमृतꣳसम्राट्चक्षुर्विराट्श्रोत्रम ५ जिह्वामे
मनो ३ भद्रंवाङ्महोमनोमन्युःस्वराड्भामः मोदाःप्रमोदाऽअङ्गुलीरङ्गानिमित्रम्मेसहः ६ बाहू
मेबलमिन्द्रियꣳहस्तौमेकर्मवीर्यम· आत्माक्षत्रमुरोमम ७ पृष्ठीर्मेराष्ट्रमुद
रमꣳसौग्रीवाश्चश्रोणी· ऊरुअरत्नीजानुनीविशोमेङ्गानिसर्वतः ८ नाभिर्मे

अभि· वित्तंविज्ञानंपायुर्मेपचितिर्भसत्· आनन्दनन्दावाण्डौमेभगःसौभाग्यंपसः ज
२ ङ्घाभ्यांपद्भ्यांधर्मोस्मिविशिराजाप्रतितिष्ठितः ९ प्रतिक्षत्रेप्रतितिष्ठामिराष्ट्रेप्रत्यश्वे
षुप्रतितिष्ठामिगोषु· प्रत्यङ्गेषुप्रतितिष्ठाम्यात्मन्प्रतिप्राणेषुप्रतितिष्ठामिपुष्टे·
प्रतिद्यावापृथिव्योःप्रतितिष्ठामियज्ञे· १० त्रयादेवाऽएकादशत्रयस्त्रिंशाःसु
राधसः बृहस्पतिपुरोहितादेवस्यसवितुःसवे॥देवादेवैरवन्तुमा ११ प्रथमाद्विती
यैर्द्वितीयास्तृतीयैस्तृतीयाःसत्येनसत्यंयज्ञेनयज्ञोयजुर्भिर्यजूंषिसामभिः
सामान्यृग्भिरृचःपुरोनुवाक्याभिःपुरोनुवाक्यायाज्याभिर्याज्यावषट्कारैर्वष २

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ष्कारा आहुतिभिराहुतयोमेकामान्त्समर्द्धयन्तुभूः स्वाहा· १२ द्यौः शान्तिरन्त
रिक्षᳬं शान्तिः पृथिवीशान्तिरापः शान्तिरोषधयः शान्तिः॥ वनस्पतयः शान्ति
र्विश्वेदेवाः शान्तिर्ब्रह्मशान्तिः सर्वᳬं शान्तिः शान्तिरेवशान्तिः सामाशान्तिरेधि
१३ तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत्· पश्येमशरदः शतञ्जीवेमशरदः शतᳬं
शृणुयामशरदः शतम्प्रब्रवामशरदः शतमदीनाः स्यामशरदः शतम्भूयश्चशर
दः शतात्· १४ स्वस्तिनऽइन्द्रोवृद्धश्रवाः स्वस्तिनः पूषाविश्ववेदाः स्वस्तिनस्ता
र्क्ष्योऽअरिष्टनेमिः स्वस्तिनोवृहस्पतिर्दधातु· १५ विश्वानिदेवसवितर्दुरिता(

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अभि· निपरासुव· यद्भद्रन्तन्न आसुव १६ सहस्राक्षं शतधारमृषिभिः पावमानं कृतम्· ते
३ न त्वामभिषिञ्चामि पावमान्यः पुनन्तु ते १ भगवन्नेव रुणो राजा भगं सूर्यो बृह
स्पतिः भगमिन्द्रश्च वायुश्च भगं सप्तर्षयो ददुः २ यत्ते केशेषु दौर्भाग्यं सीमन्ते
यच्च मूर्धनि· ललाटे कर्णयोरक्ष्णोरापस्तद् घ्नन्तु सर्वदा ३ आयुरारोग्यमै
श्वर्यमरिपक्षक्षयः सुखम्· सन्तोषः शान्तिरालिक्यं विद्या भवतु मे सदा ४ सु
रास्त्वामभिषिञ्चन्तु ब्रह्मविष्णुमहेश्वराः वासुदेवो जगन्नाथस्तथा संकर्षणो
विभुः १ प्रद्युम्नश्चानिरुद्धश्च भवन्तु विजयाय ते· आखण्डलोऽग्निर्भगवान्यमो २

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वैनिर्ऋतिस्तथा २ वरुणः पवनश्चैव धनाध्यक्षस्तथा शिवः ब्रह्मणा सहि
तः शेषो दिक्पालाः पान्तु ते सदा ३ कीर्त्तिर्लक्ष्मीर्धृतिर्मेधाः पुष्टिः श्रद्धा क्रि
या मतिः बुद्धिर्लज्जा वपुः शान्तिस्तुष्टिः कान्तिश्च मातरः ४ एतास्त्वामभि
षिञ्चन्तु देवपत्न्यः समाहिताः आदित्यश्चन्द्रमा भौमो बुधजीवसितार्कजाः
५ ग्रहास्त्वामभिषिञ्चन्तु राहुकेतु च तर्पिताः देवदानवगंधर्वा यक्षराक्ष
सपन्नगाः ६ ऋषयो मुनयो गावो देवमातर एव च देवपत्न्यो द्रुमा नागा
दैत्याश्चाप्सरसां गणाः ७ अस्त्राणि सर्वशास्त्राणि राजानो वाहनानि च ०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

औषधानि च रत्नानि कालस्यावयवाश्च ये ८ सरितः सागराः शैलास्तीर्थानि
निजलदा नदाः एते त्वामभिषिञ्चन्तु सर्वकामार्थसिद्धये ९ ॐ शान्तिरस्तु
१ पुष्टिरस्तु २ तुष्टिरस्तु ३ यच्छ्रेयस्तदस्तु ४ यत्पापं प्रतिहतमस्तु ५ अमृताभिषे
कोस्तु ६ इत्यभिषिंच्य ततो यजमानोऽभिषेकार्द्रवस्त्रं परित्यजेत् अन्येवा
ससी परिधाया ग्रीहणां आशीर्वादमंत्राः ॐ आ ब्रह्मन्ब्राह्मणो ब्रह्म
वर्च्चसी जायतामाराष्ट्रे राजन्यः शूर इषव्योऽतिव्याधी महारथो जायतान्
दोग्ध्री धेनुर्वोढानड्वानाशुः सप्तिः पुरन्धिर्योषा जिष्णू रथेष्ठाः सभेयो युवा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स्य यजमानस्य वीरो जायतान्निकामेनिकामेनः पर्ज्जन्यो वर्षतु फलवत्यो
नऽओषधयः पच्यन्तां योगक्षेमो नः कल्पताम् १ आयुष्यं वर्च्चस्यꣳ रायः
स्पोषमौद्भिदम्· इदꣳ हिरण्यं वर्च्चस्वज्जैत्रायाविशतादु माम्· २ न तद्रक्षाꣳ
सि न पिशाचास्तरन्ति देवानामोजः प्रथमजꣳ ह्येतत्· यो बिभर्त्ति दाक्षायणꣳ
हिरण्यꣳ स देवेषु कृणुते दीर्घमायुः स मनुष्येषु कृणुते दीर्घमायुः ३ दीर्घा
युत्वाऽओषधे खनिता यस्मै च त्वा खनाम्यहम्· अथो त्वन्दीर्घायुर्भूत्वा
शतवल्शा विरोहतात्· ४ पुनस्त्वादित्या रुद्रा वसवः समिन्धताम्पुनर्ब्रह्मा

व

आशी· णोद्यमुनीथयज्ञैः घृतेनत्त्वनान्वं·वर्द्धयस्वसत्याःसन्तुयजमानस्यकामाः५
५ मनसःकाममाकूतिंवाचःसत्यमशीय· पशूनांरूपमन्नस्यरसोयशःश्रीः
श्रयताम्· ६ अग्नेस्त्रोहिणुप्रथमोदेवयताञ्चक्षुर्देवानामुतमर्त्यानाम्· इयक्ष
माणाभृगुभिःसजोषाःस्वर्य्यन्तुयजमानाःस्वस्ति ७ नेवाललक्ष्मीतिमंत्रंपठि
त्वा·वक्ष्यमाणमंत्रैर्यजमानायतिलकादिकंकुर्युः श्रीर्वर्चस्वमायुष्यमारोग्य
माविधात्पवमानंमहीयते· धान्यंधनंपशून्बहुपुत्रलाभंशतसंवत्सरंदीर्घ
मायुः १ मंत्रार्थाःसफलाःसन्तुपूर्णाःसन्तुमनोरथाः॥ शत्रूणांबुद्धिनाशोस्तुमि ५

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यारणाभ्युदयोस्तुवः २ भद्रमस्तुशिवंचास्तुमहालक्ष्मीप्रसीदतु · रक्षंतुत्वांसदा
देवाआशिषःसन्तुसर्वदा ३ अव्याधिनाशरीरेणमनसाचनिराधिना · पू
र्यन्वर्षिनामाशास्त्वंजीवशरदांशतम् ४ रक्षाबन्धनमंत्रः येनवद्धोब
लीराजादानवेन्द्रोमहाबलः तेनत्वांप्रतिवध्नामिरक्षेमाचलमाचल · त्वंप्य
विष्टदायुयोन्हः १ पाहिस्थिरायुधीशिरः रक्षातोकमुतात्मना · तिलकमंत्रः त्र्या
युषञ्जमदग्नेकश्यपेतिललाटे · ॐ कश्यपस्यत्र्यायुषमितिग्रीवायाम् · ॐ यद्दे
वेषुत्र्यायुषमितिदक्षबाहुमूले · ॐ तन्नोऽअस्तुत्र्यायुषमितिहृदि · ततःसर्वे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

आश्री॰ कर्मब्रह्मार्पणं कुर्यात्॰ ॐ इतः पूर्वं प्राणबुद्धिदेहधर्माधिकारतो जाग्रत्स्वप्नसु
६ षुप्त्यवस्थासु मनसा वाचा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना यत्स्मृतं यदुक्तं यत्कृ
तं तत्सर्वं ब्रह्मार्पणं भवतु स्वाहा॰ मां मदीयं च सकलं हरये तु समर्पये॰ ॐ त
त्सत्॰ कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्यात्मना वा ऽनुसृतिस्वभावात्॰ करोमि
मि यद्यत्सकलं परस्मै नारायणायेति समर्पयामि॰ इति मंत्राभ्यां स्ववामह
स्ते जलं समर्पयेत्॰ ततः सुहृद्भिः सह भुंजीत॰ यथासुखं विहरेत् ॥ इति राम
दत्तकृत कर्मकाण्डपञ्चतो सामान्यकाण्डः प्रथमः समाप्तः ॥ ॥ ॥ ६

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu